संस्कृत-विमर्शः

(द्वितीयोभागः १९८६)

प्रधान संपादकः

डॉ॰ मण्डन मिश्रः, निदेशकः

संपादकः

पं॰ श्री संपन्नारायणाचार्यः

न्यायमीमांसा, वेदान्त विद्वान्

उपनिदेशकः

राष्ट्रिय संस्कृत संस्थानम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृत - विमर्शः

(राष्ट्रिय संस्कृत संस्थानस्य षाणमासिकी शोध पत्रिका)

चतुर्दशः खण्डः | १९८६ | द्वितीयोभागः

प्रधान सम्पादकः

डा० मण्डन मिश्रः, निदेशकः

सम्पादकः

पं० श्री संपन्नारायणाचार्यः

न्याय, मीमांसा, वेदान्त विद्वान्, उपनिदेशकः

राष्ट्रियसंस्कृतसंस्थानम्

नई दिल्ली—२७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः
डॉ० मण्डनमिश्रः निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
विशाल एन्क्लेव, राजौरी गार्डन
नई दिल्ली—२७

मूल्यम् : पञ्चदशरूप्यकाणि

मुद्रकः
अमर प्रिंटिंग प्रेस
८/२५, विजय नगर,
दिल्ली—९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयानुक्रमणिका

संस्कृतम्

क्र.	विषयः	लेखकः	पृष्ठम्
१.	मनोविज्ञानप्रयोगस्य निर्वहणं प्रतिवेदनञ्च	—डॉ० पी० सुब्बरायन् —वी० मुरलीधर शर्मा	१
२.	सौन्दरनन्दं महाकाव्यम्	—डॉ० इन्द्रचन्द्र शास्त्री	१४
३.	शब्दशक्तिविवेकः—मम्मटाचार्याभिमतः	—डॉ० वनेश्वर पाठकः	२५
४.	भारतराष्ट्रीयकांग्रसीयेतिहासः राष्ट्रीयान्दोलनकथा	—के० कस्तूरिरंगाचार्यः "श्रीरंगमुनि":	५५

English

1. A note on complement structure in sentences in modern spoken sanskrit as recorded on tapes. 1
—Dr. R. N. Aralikatti

2. Authority a source of knowledge 9
—Dr. Indra Chandra shastri

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनोविज्ञानप्रयोगस्य निर्वहणं प्रतिवेदनञ्च

(Conducting & Reporting the Psychology Practical)

Dr. P. Subbarayan
Ph-D., Lecturer
Kendriya Sanskrit Vidyapeetha,
Tirupati

V. Muralidhar Sharma
Research Scholar
S L.B.S.K.S Vidyapeetha
New Delhi-16

उपोद्घातः
(Introduction)

शिक्षाशास्त्रिछात्राणां मनोविज्ञानप्रयोगेषु प्रशिक्षणमस्याः हस्त-पुस्तिकायाः उद्देश्यम्। तदाधारभूतानां प्रायोगिकमनोविज्ञानस्वरूप-स्वभाव-सिद्धान्तानां सरलतया प्रतिपादनमेवाऽस्याः पुस्तिकायाः आशयः।

लोके यत्किमपि विज्ञानं शास्त्रं वा निसर्गादेव गहनं भवति। अतः नूतनतया तत्तच्छास्त्रमधीतुकामैः क्लेशोऽवश्यमनुभूयते। अत्र मनोविज्ञान-मप्यपवादत्वं न भजते। पुनश्च मनोविज्ञाने प्रायोगिकमनो विज्ञानशाखा जटिलतमा। अस्याः अध्ययनाय भौतिक जीवविज्ञानानां तत्व, गणित शास्त्राणां च ज्ञानमावश्यकम्। यद्यपि पूर्वोक्तानां सर्वेषां विषयाणां परिपूर्णं ज्ञानमसम्भवि, तथापि प्रायोगिकमनोविज्ञाने प्रयोजनानुरूपः प्रवेशः छात्राणामावश्यक एव। अत्र शिक्षाशास्त्रिछात्राणां ज्ञानानुरूपं आवश्यकतानुरोधं च मनोविज्ञानप्रयोगविषयः प्रस्तूयते। सर्वस्याप्यध्यय-नस्य रीतिद्वयं—शास्त्रीयं वैज्ञानिकं च। शास्त्रीये विधौ प्रतिपादकस्य कश्चिद्विशिष्टः सिद्धान्तो भवति। अत्र सिद्धान्ताः सर्वे बौद्धिकाः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"वैज्ञानिकविधौ तु सर्वमनुभवाश्रितम् । स्वानुभवोऽत्र प्रमाणम्, नत्वाप्तवाक्यम् । स्वानुभवस्य आधारश्च प्रत्यक्षज्ञानम् । प्रत्यक्षज्ञानमपि परीक्षणाश्रितम् । न हि परीक्षणैः प्रयोगैर्वा विना वैज्ञानिकं ज्ञानमुपलभ्यते (अग्निहोत्री १९६३)". विज्ञाने निश्चितानां सिद्धान्तानां याथार्थ्यं (Precision) सत्यापनत्वं (verifiability) सार्वत्रिकत्वं च साधारणधर्माः ।

सर्वमप्याधुनिकविज्ञानं भौतिक-जीव-सामाजिक भेदेन त्रिधा विभज्यते (Physical, Natural & Social sciences) । इदंप्रथमतया भौतिकविज्ञानमनन्तरं जीवविज्ञानं ततश्च सामाजिकविज्ञानं विस्तारितम् । भौतिकजीवविज्ञाने अष्टादश एकोनविंशतितम शतकयोः विकसिते विज्ञानत्वं च प्राप्ते । स्वीयसिद्धान्तरूपणे वैज्ञानिकविध्याश्रयणमेव एतेषां विज्ञानानां विज्ञानत्वप्राप्तौ निदानम् ।

अत्र वैज्ञानिकविधेः स्वरूपं कीदृशमिति नातिविस्तरं व्याख्यास्ते । अयं विधिः नैयायिकानां पंचावयववाक्यसदृशः । परिशीलनं (observation) प्राक्कल्पनं (Hypotheses) दत्तांशसंग्रहणं-विषयः (Collection of Data) विश्लेषणं (Analysis) निष्कर्षः (Conclusion) इति पंचसोपानात्मकोऽयं विधिः । आत्मनः परितः विद्यमानामेकां प्राकृतिकप्रक्रियामसकृत् पश्यति मानवः परिशीलयति च । परिशीलनेन अस्याः प्रक्रियायाः अयं स्वभाव इति निश्चित्य प्रतिज्ञावाक्यं प्रतिपादयति । अस्यैव 'प्राक्कल्पना' इति व्यपदेशः । ततश्च सः तत्सम्बद्धऽन्वयव्यतिरेकदृष्टान्तान् संगृह्णाति । तथा संगृहीतस्य विषयसमुच्चयस्य "दत्तांश" (Datum) इति नाम । दत्तांशाधारेण तं विश्लिष्य तदनुसारेण स्वकल्पितप्राक्कल्पनां स्वीकरोति अथवा तिरस्करोति । अत्र सांख्यिकशास्त्रस्योपयोगः अधिकः । स्वीकृता अथवा तिरस्कृता प्राक्कल्पना लोके सिद्धान्तरूपेण प्रवर्तते । नैतावता विरम्यते वैज्ञानिकेन । प्रत्युत सिद्धान्तितस्य तथ्यस्य सत्यापनमपि (fact verification) बहुधा करोति सः । येन कल्पितः सिद्धान्तः गौरवं भजते । परन्तु सिद्धान्तस्य परिष्कारः तत्परिवर्तनं वा कर्तव्यमेव । वस्तुनिष्ठत्वं, पक्षपातरहितत्वं, सत्यापनं च वैज्ञानिकविधेः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लक्षणानि। अत एत तदाधारेण निरूपितानां सिद्धान्तानां वैशिष्ट्यं भवति। अयं च विधिः 'बेकन्' (Bacon) महाशयस्य प्रतिभाप्रसूतः "डार्विन्" (Darwin) महाशयेन उपर्युक्तप्रकारेण रूपितश्च ॥

सामाजिकविज्ञानं तु मन्दं मन्दं वैज्ञानिकविधिमशिश्रयत्। सामाजिकविज्ञानेषु अन्यतमं मनोविज्ञानं भवति। यद्यपि 'टेक्नर्' (Techner, 1860) 'ऊट्' (Wundt 1879) 'एब्बिंघस्' (Ebbinghaus, 1879) इत्यादयः मनोवैज्ञानिकाः स्वकीयसिद्धान्तस्थापनाय वैज्ञानिकविधिं अनुसन्धानितवन्तः, तथापि मनोविज्ञानस्य विंशतितमशतकारम्भे एव विज्ञानसंज्ञा लब्धा।

मनोविज्ञानं विज्ञानं भवितुमर्हतीति निरूपणायैव (Wundt, 1876) वत्सरे LEIPZIG नगरे ऐदंप्राथम्येन मनोविज्ञानप्रयोगशालामस्थापयत्। तदाप्रभृति मनोविज्ञानं त्वरितगत्या अभिवृद्धिदशामाप्नोत्।

अत्र वैज्ञानिकविधेः एकमुदाहरणं प्रस्तूयते। वैद्यः मानवानां सर्वेषां हृदयं वामपार्श्वे एव अस्तीति परिशीलयति। एवम् असकृत् तद्दर्शनेन तन्मनसि कश्चन भावः स्थिरो भवति। सः एवं प्रतिपादयति—"मानवानां हृदयं वामपार्श्वे भवतीति। इदमेव प्रतिज्ञावाक्यं "प्राक्कल्पना" इत्युच्यते। अनन्तरमस्याः प्राक्कल्पनायाः निरूपणाय भवति दत्तांशसंग्रहणम्। अत्र अनेकाः दृष्टान्ताः परिशीलनायाः भवन्ति। सर्वत्र केवलान्वयी भवति चेत् तदा सा प्राक्कल्पना सिद्धान्तो भवति। काले काले पुनः पुनः बहुत्र बहुभिः वैज्ञानिकैः सिद्धान्तितस्य विषयस्य सत्यापनं क्रियते। अस्य यदि व्यतिरेकदृष्टान्तो दृश्यते चेत् तदपवादत्वेन गृह्यते। केषुचित् मानवेषु हृदयं दक्षिणपार्श्वे दृष्टम्। परिशीलनानन्तरं पूर्वस्वीकृतसिद्धान्तस्य परिष्कारः एवं कृतः। मानवानां हृदयं वामपार्श्वे भवति। तथापि दशसहस्रजनेषु एकस्य हृदयं दक्षिणपार्श्वेऽपि सम्भवतीति। "जीवव्यवहाराध्ययनं मनोविज्ञानमि"ति तल्लक्षणं सर्वैरंगीक्रियत एव। अस्य विज्ञानस्य क्षेत्रमाधुनिककाले बहुविस्तृतं संजातम्। अध्ययनसौलभ्यायेदं शास्त्रं बहुधा विभज्य अधीयते। अत्र स्थितः एकैकः भागः एकैकशाखात्वेन परिगण्यते। तत्रैकैका

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाखा कमपि विषयमधिकृत्य विपुलतरं विचारं प्रस्तौति। एवमत्र शिक्षा-प्रायोगिक-शिशु-पशु-अपसामान्य औद्योगिकादयः शाखाः विद्यन्ते। तासु प्रायोगिकमनोविज्ञानमन्यतमा शाखेति ज्ञेयम्। अत्र प्रायोगिकमनोविज्ञानं मनोविज्ञानाध्ययने वैज्ञानिकविधेः अनुप्रयोगात्मकं रूपम्। अतः प्रायोगिक-मनोविज्ञानशाखयैव मनोविज्ञानस्य विज्ञानत्वमिति स्पष्टम्। अन्यच्च मनोविज्ञानमेकं प्रायोगिकविज्ञानं (Experimental Science) भवति। अत्र शास्त्रप्रवृत्तये अंगीकृतानां सिद्धान्तानां अनुभवात्मक-निरूपणम् (Empirical Proof) तथा सत्यापनं च सर्वथा विधीयते। क्षेत्रपरिशीलनेन प्रयोगेण वा सर्वथा सत्यापनमवश्यं भवत्येव। इतरशाखासु विद्यमानानां नूतनानां सिद्धान्तानां स्थिरीकरणं निरूपणं चात्र अपेक्ष्यते। अतः नियत-प्रयोगाणां कल्पनमाचरणं च अस्याः शाखायाः उत्तरदायित्वं भवति।

विज्ञानेषु प्रयोगाः (EXPERIMENTS IN SCIENCES):—

प्रयोगास्तु भौतिक-जीव-सामाजिक-विज्ञानेषु प्रसिद्धाः। तर्हि कोऽयं प्रयोगः-उच्यते-"नवीनविषयसंग्रहणाय सुनियोजितक्रियैव" प्रयोगनाम्ना अभिहिता। "प्राक्कल्पनायाः सत्यापनाय नियन्त्रितसंदर्भे एकाधिकचराणां परिवर्तनेन व्यवहारस्य अध्ययनं" इति प्रयोगं प्रकारान्तरेण परिभाषयितुं शक्नुमः।

कस्यापि शास्त्रस्य (१) विषयावगाहनम्, (२) मापनम्, (३) ऊहः, (४) नियन्त्रणम्, इति उद्देश्यचतुष्टयं विद्यते। मनोविज्ञानस्य जीवव्यवहार-विषये उपर्युक्त–उद्देश्यचतुष्टयमस्ति। विशिष्य व्यवहारमापनं मनोविज्ञान-स्य प्रमेयं भवति। न केवलं मापनमेव, प्रत्युत ऊहानियन्त्रणमपि अस्य विषयः।

किमर्थं प्रयोगाः करणीयाः ?

प्रयोगाणां कानिचित् निश्चितोद्देश्यानि भवन्ति। तान्यत्र निर्दिश्यन्ते

१. छात्राणां सिद्धान्तभागाध्ययनसमकालं प्रयोगाभ्यासः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. सैद्धान्तिकरूपेणाधिगतस्य विषयस्य निरूपणम् ।

३. वैज्ञानिकविधिप्रयोगे प्रशिक्षणम् ।

४. प्राक्कल्पनासंरचनायां तत्प्रतिपादने चाभ्यासः ।

५. संरचितप्राक्कल्पनानां परीक्षणे आवश्यिक्याः प्रयोगरचनायाः अभ्यासः ।

६. प्रयोगनिर्वहणाय आवश्यकोपकरणनिर्माणे अभ्यासः ।

७. वैज्ञानिकविधिना निरूपिततथ्यानां मुख्यं लक्ष्यं भवति सत्यापनम् । एकेन शोधकेन एकस्मिन् प्रयोगकरणे यानि फलानि प्राप्तानि तानि इतरानुशोधकेन प्राप्तप्रयोगफलैः तोलयितव्यानि ।

अत्र उभयोरेकवाक्यता चापेक्ष्यते । एतदेव "सत्यापनं" इत्युच्यते । मनोवैज्ञानिकैः सर्वदा प्रयोग—फलितानि अभिलिखितानि । एतेषां सत्यापनाय पुनः पुनः काले काले च प्रयोगाः परिवर्तनीयाः । कदाचित् पूर्वापरफलितयोर्मध्ये भेदस्स्यात् । तदनुगुणं समग्रसिद्धान्तस्य तदेकदेशस्य, वा परिवर्तनमपि सम्भवेत् ।

एवं प्रयोगे अभ्यासः निश्चितसिद्धान्तानां सत्यापनं च सिद्ध्यति ।

मनोविज्ञानप्रयोगाः
(EXPERIMENTS IN PSYCHOLOGY)

भौतिक जीवशास्त्रप्रयोगेभ्यः मनोविज्ञानप्रयोगो भिन्नो भवति । भौतिकशास्त्रे तु केवलं निर्जीवपदार्थानामेव प्रयोगः । अत्र विषयः जडपदार्थ एव । जीवशास्त्रेषु प्रायेण जीवं निर्जीवं कृत्वा उत मृतस्योपरि वा प्रयोगः क्रियते । तदाधारेण अनुमानप्रमाणेन सिद्धान्तस्थापनं भवति । मनोविज्ञाने तु सचैतन्यस्य जीवस्योपर्येव प्रयोगः क्रियते । अतोऽत्र प्रयोगः संवेदनशीलो (sensitive) भवति । किञ्च भौतिकजीवशास्त्रैः निर्धारितप्रयोगाधारेण, तैः प्रमाणीकृतोपकरणाधारेण च मनोविज्ञानप्रयोगः प्रचलति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनोविज्ञानप्रयोगे जीवद्वयस्य भागभागित्वमत्यावश्यकम् । एकः प्रयोक्ता (Experimenter) अपरश्च विषयः (Subject=प्रयोज्यः) प्रयोक्ता तु प्रयोगकर्ता । सः विषयमाधारीकृत्य प्रयोगं कुरुते । अतः विषयः उपकरणेष्वन्यतम इत्येव ग्राह्यः ।

मनोविज्ञानप्रयोगाः त्रिविधाः (१) प्रदर्शन (Demonstration), (२) सामूहिक (Group), वैयक्तिक (Individual) भेदात् ।

प्रदर्शनप्रयोगेषु मनोविज्ञानी प्रयोगशालायाम् अनुदेशक(Instructor) रूपेण भवति । सः एकं छात्रं विषयत्वेन स्वीकृत्यप्रयोगं करोति । इतरे छात्रा प्रयोगं सम्यक् परिशीलयन्ति । फलितानि पंजीकुर्वन्ति च । सामूहिकप्रयोगेषु अनुदेशकः प्रयोक्ता भवति । कक्ष्यायां स्थितास्सर्वे छात्राः विषयाः भवन्ति । प्रयोगात्पूर्वं प्रयोक्ता समूहमुद्दिश्य आवश्यकसूचनाः ददाति । अत्र प्रसिद्धमुदाहरणं बिनेट्सैमन् (Binnet Simon) बुद्धिपरीक्षाः ।

वैयक्तिकप्रयोगेषु छात्रयुग्मो भवति । तस्मिन्नेकः प्रयोक्ता(प्र) अपरः विषयो (वि) भवति । प्रयोग समाप्त्यनन्तरम् अन्योन्यपरिवर्तनं भवति । अर्थात् प्रथमः विषयः (वि) द्वितीयस्तु प्रयोक्ता (प्र) । एवं च पर्यायेण उभावपि प्रयोक्तृविषयौ भवतः ।

प्रयोगप्रतिवेदनम्
(Reporting An Experiment)

प्रयोगकरणानन्तरं कृतप्रयोगो विवरणीयो भवति । अन्यथा तद्विषये कृतः श्रमः निष्फलस्तिष्ठेत् । अत्र प्रयोगे स्वीकृतप्राक्कल्पनाः, चरान्, उपकरणानि, प्रक्रमं, फलितानि, परिचर्चां, निष्कर्षान् चोद्दिश्य वर्णनीयम् । प्रतिवेदनसमर्पणे काचनसामान्यरीतिः सर्वैः अंगीकृता । इयं च रीतिः षट्सोपानात्मिका । तानि च सोपानानीमानि ।

(१) उपोद्घातः (Introduction)

(क) समस्या (Problem)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(२) विधिः (Method)
(क) प्रयोक्ता—विषयश्च (Experimenter, Subject)
(ख) उपकरणानि (Apparatus)
(ग) प्रक्रिया (Procedure)

(३) फलितानि (Results)

(४) परिचर्चा (Discussion)

(५) निष्कर्षः (Conclusion)

(६) उपयुक्तग्रन्थ निर्देशः (Reference)

प्रतिवेदनं निर्दिष्टाभिलेखे (Record) लेखनीयम् । अभिलेखेऽस्मिन् दक्षिणपार्श्वपृष्टानि रेखाङ्कितानि वामपार्श्वस्थानि श्वेतानि च भवन्ति । अन्ते रेखाचित्रप्रदर्शनाय रेखापृष्टानि (Graph) भवन्ति । आदौ विषय-सूचीभवति । अस्मिन्नभिलेखे दक्षिणपृष्टेषु प्रतिवेदनं लेख्यम् । सारणीनां (Tables) चित्राणां च प्रदर्शनायैव वामपृष्टान्युपयोक्तव्यानि ।

प्रतिवेदनलेखनविधानम्

आदौ दक्षिणपृष्टस्याग्रे प्रयोगनाम लेख्यम् । दक्षिणपृष्टे वामकोणे ऊर्ध्वभागे च प्रस्तुतप्रयोगस्य क्रमसंख्या, दिनांकश्च लेखनीयः ।

यथाः—

शीघ्स्मृतिविस्तारः

प्र. क्र. सं—
दि. ११-११-८५ ______________

____

______ . ______

____

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृहदक्षरैः प्रयोगशीर्षिका लेखनीया। एतल्लेखनं कदाचित् विविधवर्णैश्च रंजितं भवितुमर्हति। अभिलेखः सुन्दरः स्यात्।

प्रयोगस्य नाम

नाम लघु स्यात्। यद्यपि नाम यावच्छक्यं लघ्वपेक्ष्यते, तथापि नाम्नैव प्रयोगस्वभावः अवगन्तव्यो भवेत्। अधीयमानचराः (Variables) अत्र विशदीकर्तव्याः!

उपोद्घातः (Introduction)

प्रस्तुतप्रयोगस्य सिद्धान्तभूमिः स्पष्टतया सरलतया च प्रतिपाद्या। अत्र सिद्धान्ते विद्यमानाः मतभेदाः प्रदर्शनोयाः। प्राक्कल्पना स्वीकृता चेत् विवरणीया। पूर्ववैज्ञानिकैः प्राप्तफलितान्यत्र उल्लेख्यानि। यदि विरुद्धफलितानि पूर्वोक्तैः विवृतानि चेत् तान्यपि प्रस्तोतव्यानि। भवदीया परिचर्चा अप्यावश्यकी।

अत्र मतभेदप्रतिपादनं चैवं भवेत्। "वाट्सन्" (Watson 1910) महाशयेन प्राप्तफलिताधारेण निर्णयोऽयं कृतः। परं "गेस्टाल्ट्" (Gestalt विज्ञानिना कोहलर् (Kohler, 1912) महोदयेन कृताः प्रयोगनिर्णया एवं विद्यन्ते। अत्र कारणानि तु…………………इत्यादि।

(१) समस्या (Problem)

समस्यायाः प्रतिपादनं, स्पष्टं, आकांक्षारहितं, निस्सन्दिग्धं च भवेत्। यथा—"शीघ्रस्मृतिविस्तारस्य सीमा निर्णयः"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(२) **प्रयोगोद्देश्यानि** (Aims of experiment)

प्रयोगेण लक्षितः विषयः स्पष्टः, (Clear) सरलपदवर्णितः, विशिष्टश्च (Specific) भवेत्। यथा—विषयस्य शीघ्र-दीर्घ स्मृतिसीम्नोः तुलनम्।

विधिः (Method)

(१) अत्र भागग्राहिणामुल्लेखः कार्यः। यथा-

प्रयोक्तुर्नाम	PSR
कक्ष्या	शिक्षाशास्त्री
विषयस्य नाम	NSR
आयुः	४० वर्षाणि
लिंगम्	पुरुषः
स्वास्थ्यम्	
भौतिकम्	समीचीनम्,असमाचीनम्
मानसिकं च	do
शैक्षणिकार्हता	शास्त्री/आचार्य इत्यादि

उपकरणानि (Apparatus)

अत्र प्रयोगे उपयुज्यमानान्युपकरणानि वर्णनीयानि। उपकरणानि द्विविधानि सामान्य, विशेषभेदात्। Pencil, Rubber, Blade and Scale इत्यादीनि सामान्यानि। विशेषोपकरणानि तु प्रयोगभेदेन भिन्नानि भवन्ति। अत्र उपकरणस्याकारो वर्णनीयः। तच्चोपकरणं ऐदंप्राथम्येन केन विज्ञानिना, कदा चोपयुक्तमिति वर्णनीयम्। अनन्तरं कथमनेन प्रयोगो आचरणीय इति च विवृतं भवेत् उपकरणस्य चित्रं वामपृष्टे अङ्कन्या (Pencil) एव चित्रितव्यं भवेत्। चित्रे च उपकरणस्य विभिन्न-भागाः अंकनीयाः।

प्रक्रमः (Procedure)

प्रयोगविधानमत्र वर्णनीयस्। कास्सूचनाः कदा देया इति चात्र विवेचनीयम्। प्रक्रमप्रकारवर्णने भाषाप्रौढिमा अनावश्यकी। अपि चात्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतिशयोक्तेः ईषदपि स्थानं न तिष्ठेत् । सरलवाक्यैः, स्पष्टैश्च पदैः सोपानक्रमेण प्रयोगप्रकारो वर्णनीयः । सर्वदा भूतकालिकप्रयोगाः करणीयाः ।

यथा—विषयस्याभिमुखं उपकरणं स्थापितम् । एत्रं च सूचनाः दत्ताः । अनेन प्रकारेण प्रयोगः कृतः इत्यादिना ।

फलितानि (Results)

अत्र प्रयोगेण प्राप्तानि फलितानि प्रदर्शनोयानि ।

विषयानुसारं सारणीरूपेण फलितानि लेख्यानि । सारणीनां क्रम-संख्या अरबिक्संख्यासु (यथा १,२,३) देया । ततश्च सारण्यां प्रदर्शनीय-विषयस्य शीर्षिका लेख्या ।

यथा—सारण्यां (१) प्रयोज्यस्य शीघ्रस्मृतिविस्तारः प्रदर्शितः ।
सारण्यां (२) समुदायस्य शीघ्रस्मृतिविस्तारः प्रदर्शितः ।

इदमवधेयम्

सारणीप्रदर्शनं तु सर्वदा अभिलिखे वामपार्श्वे स्थितेषु श्वेतपत्रेष्वेव भवेत् । न कदापि दक्षिणपत्रेषु । सारणीनां लेखनं अङ्कन्या (Pencil) एव कार्यम् ।

(२) चित्राणां रेखा चित्राणां च नामांकनं, संख्यादानं चात्रैव भवेत् । चित्राणि वामभागे रेखाचित्राणि चान्ते विद्यमानस्य रेखापत्रे एव प्रदर्शनी-यानि ।

परिचर्चा (discussion)

अस्मिन् विभागे अनुसन्धात्रा प्राप्तफलितानामनुसारं स्वीकृत-प्राक्कल्पनानां स्वीकरणास्वीकरणानि निश्चीयन्ते ।

अत्र पूर्वविज्ञानिभिः विवृतैः प्रयोगफलितैस्सह वर्तमानप्रयोगे प्राप्तानां फलितानां तुलना कार्या । प्रयोगविधाने उपकरणोपयोगे वा काठिन्यमनुभूतं चेत् वर्णनीयम् । एवं तन्निवारणोपायाश्च सूचनीयाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निष्कर्षः (Conclusion)

प्राप्तफलितानामाधारेण परिचर्चायाः सामान्यीकरणमत्र भवति। स्वीकृतमुद्देश्यं किं, तत्सिद्धं वा न वा, किं सिद्धान्तितं, किं तिरस्कृतमित्याद्यत्र प्रतिपाद्यम्।

उपयुक्तग्रन्थनिर्देशः (Reference)

आदौ ग्रन्थकर्तुर्नाम लेख्यम्। अत्र वंशनाम द्वितीय स्थानमर्हति। प्रारम्भिकाक्षरैः ग्रन्थकर्तुः (initials) एव लेख्यम्। ततः ग्रन्थस्य नाम। ततश्च क्रमशः प्रकाशकस्य संकेतः, संवत्सरः पृष्ठसंख्या च लेख्या। यथा—

Kuppu Swamy, B. "Elementary Experiments in Psychology" Wesley Press and Publishing House, Mysore. First Edition—1954-P, 41-48.

सुब्बरायन् पेरि, शिक्षा संख्याशास्त्रम्, श्रीनिवास प्रेस्, तिरुपतिः, १९६२, पृ. ३५, ३६.

प्रयोगशालायां सामान्यव्यवहारः

(१) सर्वसामग्रीसमेतस्सन्नेव छात्राध्यापकः आगच्छेत्। नो चेत् उपकरणानामाधमर्ण्येन ग्रहणे इतरेषां क्लेशो भवति।

(२) प्रयोगशालायां निश्शब्दताऽपेक्षिता।

(३) उपकरणानामुपयोगसमये जागरूकता अत्यावश्यकी। अन्यथा तेषां नाशेन, पतन कारणात्, तदाकारपरिवर्तनेन वा अधिकधननष्टं भवति।

(४) भवतां व्यवहारः इतरेषां प्रयोगस्य प्रतिबन्धकः न भवेत्।

(५) मनोविज्ञानप्रयोगेषु प्रायेण हावभावादिप्रदर्शनं शरीरभंगिमानां सद्यः परिवर्तनं च सामान्यम्। अतस्तत्समये परिहासः न कार्यः। अन्यथा तेन विषयः लज्जितो भवेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(६) अन्तरवेक्षणविवरणं (Introspective report) प्रतिवेदनं स्वीकरणीयम् ।

(७) 'नहि सर्वः सर्वं जानाति' इति विदितमेव खलु । एकस्मिन्विषये अतिप्रतिभावानपि अन्यत्र मन्दः भवेत् । अत एव प्रयोज्यः प्रयोगेषु न कदापि निर्विण्णो भवेत् । सः एकस्मिन् प्रयोगे असफलस्सन्नपि अन्यत्र सफलः स्यात् ।

(८) प्रयोगमध्ये प्रयोक्त्रा न कदापि फलितानि प्रकटनीयानि । अन्यथा फलितानां प्रकटनेन तत्प्रभावः प्रयोज्य व्यवहारं परिवर्तयेत् ।

(९) यथार्थप्रयोगकरणात्पूर्वं तदभ्यासः करणीयः । अनेन विषयस्य प्रयोगपरिस्थित्या सह आनुकूल्यं सिद्ध्यति ।

सामान्यनियमाः

(१) समस्या सम्यगवगन्तव्या । विधिपिर सम्यक् ज्ञातव्यः । सूचनाः सुज्ञेयाः । प्रयोगस्य सर्वाण्यपि सोपानानि सम्यगवगन्तव्यानि । एवं प्रयोग विषयमभिलक्ष्य समुचितज्ञानप्राप्त्यनन्तरमेव प्रयोगः करणीयो भवति । अन्यथा सः यान्त्रिकस्तिष्ठेत् ।

(२) विधिः सूचनाश्च सूक्ष्मतयापि न परिवर्तनीयाः । लघ्वीयानपि व्यत्यासः प्रयोग परिस्थितिं अन्यथाकरोति । अनेन फलितानां तुलनम-साध्यं भवति ।

(३) प्रयोगः न कदापि स्पर्धा भवितुमर्हति अतः प्रयोक्तृप्रयोज्ययोः प्रयोगसमहयोर्वा प्रयोगे बहुगणनान्यागन्तव्यानीति परस्परं स्पर्धा नोचिता । अन्यथा तथ्यानां (Facts) प्रकाशनं न भवति ।

(४) प्रयोक्ता सर्वदा वस्त्वाश्रयपक्षपाती भवेत् । यत्परिशीलितं तदेव फलितं विवरणीयम् न कदापि विषादः सन्तोषो वा प्रदर्शनीयः ।

(५) निर्दुष्टरूपेण फलितान्यभिलेखनीयानि । विश्वसनीयपरिशील-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नानि (Reliable observation) वैज्ञानिकविधेः प्राणाः भवन्ति। कुत्रापि दोषः कृतश्चेत् प्रयोगः पुनः प्रारम्भतः करणीय एव।

(६) प्रयोगे उपयुज्यमानं उपकरणं सम्यगवगन्तव्यम्। कथमुपकरणेन प्रयोगो विधेयः, कदा सूचनाः देयाः के विषयाः अभिलेख्याः इत्यादिकं सर्वमपि प्रयोगारम्भात् पूर्वमेव ज्ञेयम्।

(७) प्रयोगेषु प्रेरकवस्तूनि (पदानि, संख्याः इत्यादयः) युक्तकाले एव प्रदर्शनीयानि। नो चेत् एतेषां प्रेरकमूल्यानि नष्टानि भवेयुः।

(८) प्रयोगानन्तरं परिशीलनपुस्तके (Observation book) अभिलेखितफलितानि गणयित्वा अनुदेशकस्य हस्ताक्षरं स्वीकार्यम्।

(९) श्यामफलके चित्रितायां सारण्यां विषयस्य अनुक्रमांकाऽभिमुखं फलितं लेखनीयम्। एतत् समुदायफलितानां ज्ञानायोमुपकरोति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौन्दरनन्दं महाकाव्यम्

डा. इन्द्रचन्द्र शास्त्री
एम० ए०, पी-एच० डी०,
शास्त्राचार्यः वेदान्तवारिधिः, न्यायतीर्थः

संस्कृत-साहित्ये सौन्दरनन्दं नाम महाकाव्यं कमप्यपूर्वं प्रतिभा-प्रकर्षं प्रकटयति। अस्य प्रसन्नगंभीरा श्रुतिमधुरा पदावली, रुचिरा, सरसा च वर्णनपद्धतिः, नवनवा हृदयतलस्पर्शिनी भावाभिव्यक्तिः, चारुतरं चरित्र-चित्रणं चानायासेनैव सहृदयानां हृदयानि समाकर्षति। एतदीयं कथानकं त्वन्यत्र दुर्लभमेव। अस्य नायकः प्रत्यहमुपचीयमानप्रतापः, आसमुद्रमेखलं विजित-वसुन्धरः उन्मूलितारिमण्डलः तेजोराशिः कश्चिद्रा-जन्यो राजर्षिर्वा नास्तिः किन्तु स्वप्रियामुखचन्द्र-चकोरः, रस-कल्लोलिनी-राजहंसः, मृदुल-मानसः कुमारः। पिपासाकुलोऽसौ जलं पातुमिच्छति। किन्तु तृप्तेः प्रागेव पीयूषपात्रादपसार्यते। जलपात्रं पातारमन्विष्यति, पाता च पात्रं विना व्याकुलः। उभयोः करुणकथां श्रुत्वा सुतरामेवापहर्तरि क्रोधः प्रस्फुरति। अवसाने च कथं हृदय-परिवर्तनं जायते-इत्येषा कथाऽत्रा-त्यन्तरोचकशैल्या प्रस्तूयते।

अस्य रचयिता महाकविरश्वघोषः बौद्धदर्शनस्य महापण्डित असीत्। स च कनिष्कस्य समकालिक –इति किंवदन्तीभिरवगम्यते। जन्मना ब्राह्मणोऽपि स बौद्धभिक्षुको बभूव। काव्येषु तस्य सरसहृदयता प्रतिपदं स्फुटीभवति। इत्थं प्रतीयते यत् सौन्दरनन्दमहाकाव्यमिषेण सः स्वीयमेवान्तर्द्वन्द्वं प्रकटयति। स प्रथमं कविरासीत्, तदनु दार्शनिकः, तदनु च भिक्षुकः। साहित्ये दर्शने चैतादृशः समानप्रतिभा-प्रसरः श्रीहर्षं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विहायान्यत्र विरल एव। अश्वघोषस्तु कयाचिद्रीत्या श्रीहर्षमप्यतिशेते। श्रीहर्षस्य रचनासु रसप्रवाहो यत्र तत्र पाण्डित्येनावरुध्यते रसानुभूतिः पुनः पुनश्चर्वणमपेक्षते, अश्वघोषस्तु मानसमनायासेनैव प्रह्वीकरोति।

कपिलवस्तुनरेशस्य शुद्धोदनस्य द्वे भार्ये आस्ताम्। तयोर्ज्येष्ठायां मायाभिधानायां सिद्धार्थो जन्म लेभे कनीयसी च नन्दाभिधानं सुतमसूत। अयं च जातमात्र एवान्त्यन्तसुन्दर आसीत् अतएव च सुन्दरनन्देत्याभिख्यामलभत। सिद्धार्थो बाल्यादेव सांसारिकविषयेषु विरक्त आसीत् किन्तु नन्दस्तेषु भृशमरमत। कालक्रमेणबुद्धत्वमुपेयुषः सिद्धार्थस्य चरितं अश्वघोषेणैव स्वीये बुद्धचरिते चित्रितम्। तत्र च कविर्भक्तिप्रह्वीभूतः सुतरां संकोचमालम्बते। बुद्धरूपेण वैराग्यस्योच्चतममादर्शमुपस्थापयन् मानवस्य स्वाभाविकीः दुर्बलतास्तिरोहयति। सौन्दरनन्दे नास्त्यवसरस्तादृशस्य संकोचस्य।

सिद्धार्थः सद्योजाततनयां यशोधरां परित्यज्य निर्ययौ। बोधिलाभाय तत्र तत्र पर्यटन् विविधांश्च मार्गान् समाश्रयन् गयायां वटवृक्षतले बोधिमलभत। तदनन्तरं च तांस्तान् जनान् धर्ममुपदिशन् स्वजन्मभूमिं कपिलवस्तुनगरीं प्राप। तदीयागमनवार्तया नगर्यां महान् आनन्दोल्लासः समजायत। सर्वे जनाः सबन्धु-मित्रपरिजनाः दर्शनार्थं ययुः। किन्तु नन्दः स्वप्रियया सह विलासे संमग्न आसीत्। स बुद्धागमनवार्तामपि नाज्ञासीत्। नन्दस्य पत्नी सुन्दरी, सुन्दरीणां मूर्धाभिषिक्ता रमणीकुलरत्नं चासीत्। दम्पती परस्परमत्यन्तमस्निह्यताम्। नवोदितोद्दामयौवनसमुद्वेल्लितौ च सर्वमपि व्यस्मरताम्।

एकदा सुन्दरी, स्वमुखप्रसाधनवेलायां नन्दं दर्पणधारणायादिदेश। प्रियमुखोद्गतं कूर्चं च पश्यन्ती स्वमुखेऽपि तथैव चित्रितुं प्रवृत्ता। नन्दश्च सपरिहासं दर्पणं निःश्वासवाष्पेण मलिनं चक्रे। सुन्दरी मनसि प्रसन्नाऽपि तस्मै भृशं चुकोप। नन्देन च पादपतनपुरःसरं प्रसादिता पुनर्विशेषकरचनामारेभे।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्मिन्नेव काले भिक्षार्थं पर्यटन् बुद्धस्तत्र समाययौ। प्रासादाङ्गणे भिक्षापात्रं प्रसार्यावाङ्मुखश्च तस्थौ। सत्यपि अनल्पे परिजने कोऽपि तदागमनं नाज्ञासीत्। स च क्षणद्वयं प्रतीक्ष्यालब्धभैक्ष एव प्रतिन्यवर्तत।

प्रतिनिवर्तमानं तं काचित् वृद्धा परिचारिका ददर्श। लज्जा-भय-संकोच-परवशा च सा तदुदन्तं नन्दाय शशंस। स तु श्रुतमात्र एव भृशं लज्जितो बभूव, मनसि च परमं खेदमन्वभवत्। "सकललोकवन्द्यो ज्येष्ठ-भ्राता गृहं समागतः। स च केनापि न सत्कृतः। अहं च रतिक्रीडासु निमग्नः सर्वं व्यस्मरम्" इति।

भूयोभूयश्चिन्तयन्नसौ नितान्तमुद्विग्नो बभूव। तदानीमेव च बुद्धदर्शनाय मतिं व्यधात्।

विशेषक-शोषात्प्रागेव प्रत्यागमिष्यामीतिप्रतिश्रुत्य कथञ्चित् प्रियाया अनुमतिं लब्ध्वा स गृहान्निर्ययौ। प्रयान्तं तमालोक्य सुन्दर्याः व्याकुलतां कविर्निम्नाङ्कितैः शब्दैः चित्रयति—

सा तं प्रयान्तं रमणं प्रदध्यौ
प्रध्यान-शून्य-स्थित-निश्चलाक्षी।
स्थितोच्चकर्णा व्यपविद्धशष्पा,
भ्रान्तं मृगं भ्रान्तमुखी मृगीव॥

नन्दोऽपि प्रियां परित्यजन् स्वास्थ्यं नान्वभवत्। तस्यान्तर्द्वन्द्वं कविस्त्रिभिः श्लोकैर्वर्णयति—

दिदृक्षयाक्षिप्तमना मुनेस्तु
नन्दः प्रयाणं प्रति तत्वरे च।
विवृत्तदृष्टिश्च शनैर्ययौ तां
करीव पश्यन् स लडत्करेणुम्।
शातोदरीं पीनपयोधरोरूं
स सुन्दरीं रुक्मदरीमिवाद्रेः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काक्षेण पश्यन् न ततर्प नन्दः
पिबन्निवैकेन जलं करेण ॥

यथैकेन करेण जलं पिबतस्तृप्तिर्नजायते तथा काक्षेण प्रियां पश्यतो नन्दस्यतृप्तिर्न बभूव । इयमुपमा अतिशयोक्तिहीनाऽपि हृदयं गृह्णाति ॥

तं गौरवं बुद्धगतं चकर्ष,
भार्यानुराग इत राचकर्ष ।
सोऽनिश्चयन्नापि ययौ न तस्थौ,
तरंस्तरङ्गेष्विव राजहंसः ॥

नन्दस्त्वरया बुद्धसमीपं प्राप्तः । तत्र च दर्शनार्थं समागतानां जनानां महता सम्मर्देन विघ्नितः उपगन्तुं न शशाक । चिरप्रतीक्षानन्तरमवसरं लब्ध्वा स बुद्धान्तिकं जगाम, सादरं प्रणम्य बद्धाञ्जलिः क्षमां ययाचे, स्वकीयसपर्याग्रहणाय च प्रार्थयामास । किन्तु बुद्धः प्रत्युवाच इदानीं भोजनवेलाऽतिक्रान्ता, स्वकीयं च भिक्षापात्रं नन्दहस्ते स्थापयामास । नन्दस्तु 'विशेषकशोषात् प्रागेव प्रत्यागमिष्यामीति सुन्दर्यै प्रतिश्रुतां प्रतिज्ञां भूयोभूयोऽस्मरत् भिक्षापात्रं हस्त एव च प्रतिनिर्वर्तितुमचेष्टत । बुद्धस्तदीयं मनोभावं ज्ञात्वाऽऽध्यात्मिकबलेन तमाकर्षितुं प्रायतत, किन्तु प्रियां प्रति तस्यानुरक्तिः शिथिला न बभूव । तस्य हस्तं स्वहस्ते गृहीत्वा बुद्धो विहारं प्रति चचाल, नन्दश्चानीहमानोऽपि शनैः शनैरन्वसरत्, कविः कथयति—

नन्दस्तु दुःखेन विचेष्टमानः,
शनैरगत्या गुरुमन्वगच्छत् ।
भार्यामुखं वीक्षणलोलनेत्रं,
विचिन्तयन्नार्द्रविशेषकं तत् ॥

विहारं प्राप्य बुद्धस्तं संसारासारतां, इन्द्रियसुखानां क्षणभंगुरतां परिणाम दारुणतां चोपदिदेश, किन्तु नन्दे तस्य कोऽपि प्रभावो नालक्ष्यत । मनसा विशेषकार्द्रकपोलां प्रियां चिन्तयन्नपि स मुखेन कथंचित् तथेत्यभाषत । बुद्धस्तदैव वैदेहनामानं मुनिं नन्दं मुण्डितुं समादिदेश । किन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नन्दः कथमपि तत्परो नाभूत् । स वैदेहमुनिं स्पष्टं न्यषेधयत् । किन्तु बुद्धोप्यनायासेन नन्दं परित्यक्तुमुद्यतो नासीत् । स विविधैरुपायैः पुनरुपदेष्टुमारभत । गृहीतसंन्यासानां तदीयबन्धूनां अन्येषां च प्राचीनानां राज्ञामुदाहरणानि उपस्थापयामास, स्त्रीपरवशानां च गर्हणीयतां प्रादर्शयत् । बुद्धेन पुनः पुनः प्रेर्यमाणस्तपस्वी नन्दो मौनमवललम्बे । बुद्धश्च तस्य मनसो दुर्बलतां वीक्ष्य तदानीमेव मुण्डितवान् ।

इमां वार्तां श्रुत्वा सुन्दर्या या दशा बभूव सा केवलमनुमातुं शक्यते । कविस्तस्याः करुणक्रन्दनं निम्नाङ्कितैः शब्दैः प्रकटयति—

श्रुत्वा ततो भर्तरि तां प्रवृत्तिं,
सवेपथुः सा सहसोत्पपात ।
प्रगृह्य बाहू विरुराव चोच्चैः,
हृदीव दग्धाभिहता करेणुः ॥
सा रोदनारोपित-रक्तदृष्टिः,
सन्तापसंक्षोभितगात्रयष्टिः ।
पपात शीर्णाकुल हारयष्टिः,
फलातिभारादिव चूतयष्टिः ॥
स-पद्मरागं वसनं वसाना,
पद्मानना, पद्मदलायताक्षी
पद्मा विपद्मा पतिना चलाक्षी,
शुशोष पद्मस्रगिवातपेन
सा चक्रवाकीव भृशं चुकूज
श्येनाग्रपक्ष-क्षत-चक्रवाका ।
विस्पर्द्धमानेव विमान-संस्थैः,
पारावतैः कूजन-लोलकण्ठैः
संदृश्य भर्तुश्च विभूषणानि
वासांसि वीणा प्रभृतीश्च क्रीडा ।
तमो विवेशाभिननाद चोच्चैः,
पङ्कावतीर्णेव च संससाद

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रुरोद मम्लौ विरुराव जग्लौ,
बभ्राम तस्थौ विललाप दध्यौ ।
चकार रोषं विचकार माल्यं,
चकर्त वक्त्रं विचकर्ष वस्त्रम् ॥

"श्येनाग्रपक्षक्षतचक्रवाका' इत्यत्र परमश्रद्धालुरपि कविः बुद्धं श्येनेन तुलयन् संन्यासमार्गस्य भिक्षूणां च नैसर्गिकीं हृदयहीनतामुच्चैरुद्घोषयति। अन्तिमः श्लोको न केवलं कवेः क्रियापाण्डित्यम् प्रकटयति, किन्तु सुन्दर्या दयनीयदशां सविग्रहामिव पुरत उपस्थापयति । 'चकर्त वक्त्रं विचकर्ष वस्त्रम्' इति तु भवभूतेः पुटपाकमिव कामप्यनिर्वर्णनीयां दारुणां व्यथां व्यनक्ति । इदं च भवभूतेः "हा हा देवि स्फुटति हृदयं, स्रंसते देहबन्धः" इति पद्यं स्मारयति। समस्तः षष्ठःसर्गः सुन्दर्या विलापेन पूर्णः।

सप्तमे सर्गे नन्दस्य दीनदशा वर्ण्यते। धृतकाषायोऽपि स मनसाऽकषायो नासीत्। यदाऽन्ये भिक्षव एकान्ते उपविश्य आत्मस्वरूपमचिन्तयन् नन्दः सुन्दरीमुखमचिन्तयत् । विशेषकार्द्रकपोलां प्रियां स्मारं स्मारं स स्वयमप्यार्द्र कपोलोऽजायत। दीर्घं निःश्वसन् दीनमुखः स कुत्रापि शर्म नालभत। शीतेऽपि ग्रीष्मव्यतिकरमनुभवतस्तस्य तापं वर्द्धयितुमिव वसन्तः समाययौ। ततश्च—

स्थितः स दीनः सहकार-वीथ्याम्,
आलीन-सम्मूर्च्छित-षट्पदायाम् ।
भृशं जजृम्भे युगदीर्घबाहुः,
ध्यात्वा प्रियां चापमिवाचकर्ष ॥

स पातकक्षोदमिव प्रतीच्छन्,
चूतद्रुमेभ्यस्तनुपुष्पवर्षम् ।
दीर्घं निशश्वास विचिन्त्य भार्याम्,
नव-ग्रहो नाग इवावबद्धः ॥

अत्र नवगृहीतेन नागेनोपमा मनसो व्याकुलतां स्पष्टं व्यनक्ति। अपि च—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शोकस्य हर्ता शरणागतानाम्,
शोकस्य कर्ता प्रतिगर्वितानाम् ।
अशोकमालम्ब्य स जातशोकः,
प्रियां प्रियाशोकवनां शुशोच ।

स्वयं शोकस्य हर्ता अशोकमालम्ब्य शोकं वहतीति विरोधाभासस्य सुन्दरं निदर्शनम् । प्रियंगुलता तं सबाष्पां प्रियां स्मारयति, पुष्पावनद्धे तिलक शिखरे निषण्णा च परभृत् प्रियायाः वेणीबन्धम् । चूतमालिङ्गन्ती-मतिमुक्तकलतां वीक्ष्यासौ तांस्तान् सुरतविलासान् स्मरति—

लतां प्रफुल्लामतिमुक्तकस्य
चूतस्य पार्श्वे परिरभ्य जाताम् ।
निशाम्य चिन्तामगमत् तदैवं,
श्लिष्टा भवेत् मामपि सुन्दरीति ।।

इत्थं वसन्तलक्ष्मीस्तस्य परमसंदीपनाय बभूव । मलयसमीरे प्रियायाः निःश्वासं, भ्रमररसितेषु नूपुरारावं नृत्यन्तीषु लतासु तस्या निःश्वासगन्धं चान्विष्यन् सोऽत्यन्तमुद्विग्नो बभूव । कविस्तस्य विलापं प्रकटयति—

स तत्र भार्यारणिसम्भवेन
वितर्कधूमेन तमःशिखेन ।
कामाग्निनान्तर्हृदि दह्यमानो
विहाय धैर्यं विललाप तावत् ।।

अद्यावगच्छामि सुदुष्करं ते
चक्रुः करिष्यन्ति कुर्वते च ।
त्यक्त्वा प्रियामश्रुमुखीं तपो ये,
चेरुश्चरिष्यन्ति चरन्ति चैव ।।

तावद् दृढं बन्धनमस्ति लोके,
न दारवं तान्तवमायसं वा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावद् दृढं बन्धनमेतदेव,
मुखं चलाक्षं ललितं च वाक्यम् ।।

अत्र 'मुखं चलाक्षं ललितं च वाक्यम्' इति वाक्यं अनुभूतपूर्वाः सर्वाः विलासपरम्पराः पुरत उपस्थापयति । यथा यथासौ प्रियां चिन्तयति संयमे हतोत्साहो जायते । कामाभिभूतो धीरतां परित्यज्य तपोभ्रष्टानां देव-मुनि-राजर्षीणां चरितानि स्मरति । स चिन्तयति—

कामाभिभूतो हि हिरण्यरेताः
स्वाहां सिषेवे मघवानहल्याम् ।
सत्वेन मार्गेण च तेन हीनः,
स्त्रीनिर्जितः किं बत मानुषोऽन्यः ।।

भिक्षुवेषं च परित्यज्यासौ गृहम् गन्तुमुद्यतो भवति । मनसि कथयति—

यास्यामि तस्माद् गृहमेव भूयः,
कामं करिष्ये विधिवत्सकामम् ।
न ह्यन्यचित्तस्य चलेन्द्रियस्य,
लिङ्गं क्षमं धर्मपथाच्च्युतस्य,
पाणौ कपालमवधाय विधाय मौण्ड्यम्,
मानं निधाय विकृतम् परिधाय वासः ।
यस्योद्धवो न धृतिरस्ति न शान्तिरस्ति,
चित्रप्रदीप इव सोऽस्ति च नास्ति चैव ।।

स्वकीयाया भिक्षुकवृत्तेश्चित्रप्रदीपेनोपमायास्तस्याः फल्गुतां स्फुटं प्रकाशयति । अन्यच्च

यो निःसृतश्च न च निःसृतकामरागः,
काषायमुद्वहति यो न च निष्कषायः ।।
पात्रम् बिभर्ति च गुणैर्न च पात्रभूतो,
लिङ्गं वहन्नपि स नैव गृही न भिक्षुः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्थं उत्तरोत्तरं हीयमानोत्साहः गृहम् गन्तुं कृतनिश्चयोऽपि कातर-हृदयः स बुद्धस्योपस्थितौ तथा कर्तुं न पारयति। भ्रातुः साम्मुख्यं कर्तुमशक्नुवानः स यदा बुद्धः भिक्षार्थं बहिर्याति तदैव पलायिष्ये इति निश्चिनोति। स चिन्तयति—

पूज्यं लिङ्गं स्खलितमनसो
बिभ्रतः क्लिष्टबुद्धेः।
नामुत्रार्थः स्यात् उपहतमते-
र्नाप्ययं जीवलोकः॥

तस्मिन्नेव काले मैत्रेयनामा भिक्षुकस्तत्र समागच्छति तं च दीनमुखं विलोक्य शोककारणं पृच्छति—

किमिदम् मुखमश्रुदुर्दिनम्,
हृदयस्थम् विवृणोति ते मनः।
धृतिमेहि नियच्छ विक्रियां,
न हि बाष्पश्च शमश्च शोभते॥

नन्दः स्वहृदयव्यथां वक्तुकामस्तेन सह वनान्तरम् जगाम। तत्र सुरभिणि लतागृहे रमणीये शिलातले उपविश्य उवाच—

तदिदं श्रृणु मे समासतो
न रमे धर्मविधावृते प्रियाम्।
गिरिसानुषु कामिनीमृते
कृतरेता इव किन्नरश्चरन्॥
वनवाससुखात् पराङ्मुखः
प्रयियासा गृहमेव येन मे।
न हि शर्म लभे तया विना
नृपतिर्हीन इवोत्तमश्रिया॥

अष्टमे नवमे च सर्गे मैत्रेयस्तं प्रतिबोधयितुं यतते। स्त्रीणां चरित्रं निन्दन्नसौ कथयति—

प्रदहन् दहनोऽपि गृह्यते,
विशरीरः पवनोऽपि गृह्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुपितो भुजगोऽपि गृह्यते,
प्रमदानां तु मनो न गृह्यते ॥

स्त्रीशरीरस्य जुगुप्सनीयतां कामभोगानां परिणामदारुणतां च मुहुः मुहुः प्रतिपादयन्नसौ संन्यासमार्गस्यैकाङ्क्षितामेव प्रकटयति । मनोवैज्ञानिक-दृष्ट्या तु तस्मिंस्तिरस्कारेऽपि आसक्तिरेव व्यज्यते । नन्दे तस्योपदेशानां कोऽपि प्रभावो न जायते। तथापि भिक्षवः सकृद्गृहीतकाषायस्य गृहगमनम् अनुमन्तुं कथमपि उद्यता नासन् । ते हि शिष्यनाशं पुत्रनाशमिवामन्यन्त । मैत्रेयेण निवेदितोदन्तो बुद्धो नन्दमाह्वयत, तस्य च हस्तं गृहीत्वा स्वर्गमारु-रोह । उभौ खग-युगलमिव हिमालयम् उल्लङ्घयामासतुः । अश्वघोषकृतं हिमालयवर्णनमतीव हृदयहारि । मार्गे बुद्धः पादपशाखानिषण्णामेकां काणीं शाखामृगीम् अपश्यत् । नन्दं च तां दर्शयित्वाऽपृच्छत्—

का नन्द ! रूपेण च चेष्टया च
सम्पश्यतश्चारुतरा मता ते ।
एषा मृगीवैकविपन्नदृष्टिः
स वा जनो यत्र गता तवेष्टिः ?

नन्दः स्मितपूर्वं प्रत्युवाच—

क्व सोत्तमस्त्री भगवन् ! वधूस्ते,
मृगी नगक्लेशकरी क्व चैषा ॥

उभौ स्वर्गं प्रापतुः। तत्र चाप्सरसां विभ्रमाः नन्दं सुतराममोहयन् । ताभिः तुलनायां सुन्दरीं काणीं वानरीमिवागणयत् । तांश्च लब्धुं मनसि पुनः पुनः संकल्पान् अरचयत् । बुद्धस्तदीयं मनोभावं ज्ञात्वोवाच—यद्येताः प्राप्तुमीहसे कठोरं तप आचरणीयम् । एतास्तपोभिरेव प्राप्यन्ते ।

आत्मकल्याणाय तपः सेवितुमनीहमानोऽपि नन्दः अप्सरसां प्राप्त्यै तदङ्गीचकार । कठोरव्रताचरण-कृशकलेवरश्चासौ अस्थिमात्रावशेषो बभूव । परित्यक्तशरीरानुरागेऽपि तस्मिन् अप्सरांसि लक्ष्यीकृत्य मनोऽनु-रागः प्रतिदिनमवर्द्धत । शरीरापचयेऽपि रागापचयो नालक्ष्यत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकदा बुद्धस्य प्रधानशिष्य आनन्दस्तमुपाययौ अपृच्छच्च—भिक्षो ! किमिदं सत्यं यद्भवान् अप्सरांसि प्राप्तुं तपश्चरति ?''

नन्देन तथेति प्रत्युक्तः स सांसारिक विषयाणां तुच्छतामुपदिश्य तदर्थं कठोर साधनाया अपव्ययो मूर्खतैवेति प्रत्यपादयत् । तपः कृतचित्त-शुद्धिकारणेव आनन्दस्योपदेशः फलं लेभे । नन्दो देवाङ्गनाभ्यः सुन्दरीं व्यस्मरत् । निर्वाणसुखाय च देवाङ्गना अजहात् । हृदयेन धर्ममार्गमीहमानः स स्वयमेव बुद्धमुपजगाम स्वकीयं मानसपरिवर्तनं च निवेद्य निर्वाण-मार्गोपदेशाय प्रार्थयामास ।

पञ्चभिः सर्गैर्बुद्धस्तं निर्वाणमार्गमुपदिशति तदर्थं च ध्यानप्रक्रियां शिक्षयते । सप्तदशसर्गस्यारम्भे नन्द उच्चसमाधेरभ्यासायैकान्तवनं प्रविशति । क्रमशः चत्वारि ध्यानानि अभ्यस्य, चत्वारि आर्यसत्यानि साक्षात्कृत्य प्रज्ञापारमितां प्राप्य चार्हत्वं प्राप्नोति

कृतज्ञतावशंवदोऽसौ पुनर्बुद्धसमीपमागच्छति । तस्य च चरणौ मर्द्धना अस्पृशत् । बुद्धिमता स्वकल्याणेनैव सन्तोषो न कर्तव्यः, सर्वेषामपि कल्याणाय यतितव्यम्—इति कथयित्वा बुद्धः तं महायानपथे प्रावर्तयत् ।

अन्येषां कल्याणमार्गे प्रवृत्तोऽसौ सर्वप्रथमं सुन्दरीं स्मरति; किन्तु न विलासाय, अपि तु तस्याः कल्याणाय । स गृहं गच्छति । तत्र च सुन्दरी-मन्यांश्च परिजनान् पश्यति । किन्तु इदानीं अन्य एव नन्द आसीत् । सुन्दरी तं वीक्ष्यार्द्रकपोला बभूव । किन्तु अयमश्रुप्रवाह आनन्दस्य शोकस्य वेति कथयितुं सुदुष्करम् । सुन्दर्यै विलासी नन्दोऽधिकं अरोचत भिक्षुकनन्दो वा इत्यपि सन्देहास्पदमेव । तत्तु पाठकैः स्वयमेव निर्णेतव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दशक्तिविवेकः—मम्मटाचार्याभिमतः

आचार्य डॉ० वनेश्वर पाठकः
एम० ए०, डी. लिट०

'शब्दशक्तिविवेक:' एष विषयोऽत्र सर्वशास्त्रीयमाधारमाश्रित्य स्थितस्य मम्मटाचार्यस्य काव्यशास्त्रीयालोके सम्पत्स्यते। विवेकोऽयं शब्दं तदभिन्नत्वेन गृहीतमर्थं तयोः सम्बन्ध रूपां शक्तिञ्च विषयीकरोति। शब्दशक्तिविचारो न्यायविद्यायाम् (तर्कशास्त्रे), पद विद्यायाम् (व्याकरणशास्त्रे), वाक्यविद्यायाम् (मीमांसाशास्त्रे) तथा साहित्य विद्यायाम् (काव्यशास्त्रे) विशेषतो विस्तरतश्च दृश्यते।

काव्य शास्त्रे शब्दार्थयाः स्वरूपस्य तयोः सम्बन्धरूपायाः शक्तेश्च विस्तृतं सुव्यवस्थितं च विवेचनं मम्मटस्य काव्यप्रकाश एव दृष्टिमेति। मम्मटस्य शब्दार्थ विवेचनस्याधारो विशुद्ध काव्यशास्त्रीयोऽस्ति। अस्मिन् क्षेत्रे स प्रथमः काव्याचार्यो येनकाव्यशास्त्रे शब्दार्थयोः साङ्गोपाङ्ग विवेचनस्य परम्परा प्रचालिता।

(१) **शब्दः, अर्थः, तयोः सम्बन्धश्च**—काव्यशास्त्रे शब्दार्थयोस्तथा तयोः सम्बन्धस्य विचारः वैयाकरणानां शब्द विद्यायाः, मीमांसकानां वाक्यविद्यायाः तथा दार्शनिकानां ब्रह्मविद्यायाः प्रतिफलनमस्ति। वैयाकरणानां मते शब्दार्थावभिन्नौ तथा प्रत्येकः शब्दः स्वमर्थमभिदधाति। यथाह महाभाष्यकारः—"प्रतीत पदार्थको लोके ध्वनिः शब्द इत्युच्यते[१]।" उद्योतकारो नागेशोऽप्यत्र लिखति—'लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रिय ग्राह्यत्वाद्वर्णरूपध्वनिसमूह एव शब्द इत्यर्थः।" 'सिद्धे शब्दार्थ

---

१. महाभाष्यम्, आ० १

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्बन्धे' इति ब्रुवता महाभाष्यकारेणापि शब्दार्थयोरभिन्नत्वं तथा तयोः सम्बन्धस्य नित्यत्वं प्रतिपादितमेव। टीकाकारेण कैयटेनाप्यत्र प्रदीपे लिखितम्—'सम्बन्धस्यापिव्यवहारपरम्परायामनादित्वान्नित्यता।' नागेशेनाऽप्यत्रोद्योत टीकायां लिखितम्—'सम्बन्धश्च शक्तिरूपं तादात्म्यमेव।'' एतेनटीकाद्वयेन शब्दः, अर्थः, तयोः सम्बन्धरूपा शक्तिश्चेति त्रयं नित्यमिति महाभाष्यकारस्याशयः स्पष्टतामेति। भर्तृहरिरपि शब्दार्थयोरभिन्नतां प्रतिपादयति—"न सोऽस्ति प्रत्ययोलोके यः शब्दानुगमादृते। अनुविद्धमिवज्ञानं सर्वं शब्देनगृह्यते[1]॥"

भर्तृहरिः शब्दार्थयोः सम्बन्धस्य विषये स्फोटसिद्धान्तं स्वीकृतवानस्ति। स ध्वनिं (शब्दं) तथा स्फोटम् (अर्थम्) अभिन्नं मनुते, केवलमुपाधिभेदेन तयोर्भिन्नतां स्वीकरोति—"स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः। ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते[2]॥" भर्तृहरेर्मते ध्वनेः स्फोटस्य चाभिन्नतया ग्रहणं भवति—'स्फोटरूपाविभागेन ध्वनेर्ग्रहणभिष्यते[3]।" महाभाष्यकारस्याप्ययमेव सिद्धान्तः—'एवं तर्हि स्फोटः शब्दः, कथं भेर्याघातवत्[4]।"

आलंकारिकाऽपि वैयाकरणानां ध्वनिसिद्धान्तमिमं मूलतः स्वीकुर्वन्ति। व्याकरणं सर्वविद्यानां मूलमिति मन्यमानेनानन्दवर्द्धनेन प्रोक्तम्—"प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु पदेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थ दर्शिभिर्वाच्यवाचकभाव सम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः[5]।" मम्मटोऽपि मान्यतामिमामनुवदति—"बुधैर्वैयाकरणैः

१. वाक्य पदीयम्, ब्र० का०
२. वाक्य पदीयम्, ब्र० का०
३. " "
४. महाभाष्यम्, आ० १
५. ध्वन्यालोकः, १।१३ वृत्तिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रधानभूतस्फोटरूप व्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्य व्यङ्ग्य व्यञ्जन क्षमस्य शब्दार्थ युगलस्य[१]।" परन्त्वालंकारिकैरलंकारशास्त्रे ध्वनिः व्याकरणशास्त्रतो भिन्नरूपोविलक्षणस्वरूपश्च गृहीतोऽस्ति; इति पूर्वोद्धृतेनानन्दवर्द्धनस्य तदनुयायिनो मम्मटस्य च वचसा सुस्पष्टमेव।

प्राक्तनः काव्याचार्यो भामहो भर्तृहरे र्ध्वनिसिद्धान्तं कटुशब्दैरालोचयति—"शपथैरपि चादेयं वचो नस्फोटवादिनाम्। नभःकुसुममस्तीति श्रद्दध्यात् कः सचेतनः[२]।" शब्दोनित्योऽनित्योवेति विचारो भामहाय न रोचते। स प्रपञ्चेस्मिन् पतितुं नेच्छति—"विनश्वरोऽस्तु नित्योवासम्बन्धोऽर्थेन वा सता। नमोस्तु तेभ्यो विद्वद्भ्यः प्रमाणं येऽस्य निश्चितम्[३]" इत्यादि। अत्र भामहो बौद्धदर्शनेन प्रभावितः प्रतिभाति। बौद्ध दार्शनिकाः, विशेषतः क्षणभङ्गवादिनो दार्शनिकाः, शब्दार्थ सम्बन्धस्य नित्यतां नाङ्गीकुर्वन्ति। तेषां मतेऽर्थोऽनिर्देश्यस्तथाऽनाख्येयोऽस्ति। दिङ्नागेनाऽप्युक्तम्—'न ह्यर्थे शब्दाः सन्ति येन तस्मिन् प्रतिभासमाने तेऽपि प्रतिभासेरन्[४]।" अपोहवादिनो दार्शनिका व्याकरणदर्शनस्यशब्दार्थसत्तासिद्धान्तं खण्डयन्ति। ते शशशृंगाकाश कुसुमादि समस्तानां डित्थकपित्थादि व्यस्तानां शब्दानां सार्थकतां न स्वीकुर्वन्ति। ते शब्देऽर्थस्याध्यासमाभासं वा मन्यन्ते[५]। वैयाकरणास्तु बौद्धमेवार्थं शक्यार्थं मन्यमाना वन्ध्या सुत-खपुष्प-कूर्मक्षीर-शशशृङ्गादिषु बुद्धिपरिकल्पितमर्थमादाय तेषामर्थवत्तां स्वीकुर्वन्ति। अत एव तेषां प्रातिपदिकत्वं तेभ्यो विभक्त्युत्पत्तिश्चेति परमलघुमञ्जूषायां नागेशेन शक्तिनिरूपणे प्रतिपादितम्।

१. काव्य प्रकाशः, १।४ वृत्तिः

२. काव्यालंकारः, ६।१२

३. „ ६।१५

४. न्याय प्रवेशः, पृ० ६

५. तत्त्व संग्रहः, शब्दार्थ परीक्षा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नैयायिकास्तु शब्दार्थयोस्तादात्म्यं नाङ्गीकुर्वते। तयोस्तादात्म्याङ्गीकारे वह्निशब्दोच्चारणे मुखे दाहापत्तिः, मधुशब्दोच्चारणे च मुखे माधुर्यापत्तिः स्यादिति तेषां सिद्धान्तः। नागेशेन पूर्वोक्तन्यायेन नैयायिकानामियमापत्तिरपि निराकृताऽस्ति—'तद्भिन्नत्वेसति तदभेदेन प्रतीयमानत्वमिति भेदाऽभेद समनियतम्, अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः[1]" इत्यादि।

मीमांसका अपि शब्दार्थयोरभिन्नतां तयोः सम्बन्धस्य नित्यताञ्च न स्वीकुर्वन्ति। यथोक्तं कुमारिल भट्टेन—"न शब्दादभेदरूपेण बुद्धिरर्थेषु जायते। 'यदि चाभेदरूपेण शब्देनार्थः प्रतीयते। एकरूपत्वमक्षादौ देवनादेः प्रसज्यते[2] ॥" परन्तु मीमांसादर्शनस्य प्रवर्त्तकाचार्यो जैमिनिः शब्दार्थयोरभिन्नतां तयोः सम्बन्धस्य नित्यताञ्च स्वीकरोति। यथाह सः—'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः इति। परन्तु काव्यशास्त्रे शाब्दार्थौ नित्यौ तयोः सम्बन्धश्च नित्य इत्येतादृशो विचारो महत्त्वं नाश्रयतीति पूर्वं भामह विचारमुद्धरता प्रोक्तमेव। यद्यपि काव्य शास्त्रेऽपि शब्दार्थयोस्तथा तयोः परस्परसम्बन्धरूपायाः शक्तेश्च विचारो विस्तरतो विहितोऽस्ति; किन्तु काव्यशास्त्रे शब्दार्थौ अन्य शास्त्रेभ्यो भिन्न रूपौ गृहीतौ स्तः। काव्य शास्त्रे शब्दार्थयोर्विवेचनं कलाया दृष्ट्या कृतमस्ति। यथाह कुन्तकः—

'वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।
तथापिकाव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः॥
शब्दो विवक्षितैकार्थवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारि स्वस्पन्द सुन्दरः[3] ॥

स शब्दः काव्ये, यस्तत्समुचित समस्त सामग्रीकः, विवक्षितार्थस्य केवल एव वाचकः—अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु सामान्या-

१. परम लघु मञ्जूषा, शक्ति निरूपणम्।
२. श्लोक वार्तिकम्, सू० ४।१७२, १८६।
३. वक्रोक्ति जीवितम्, १।८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्मना वक्तुमभिप्रेतोयोऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग् वाचकत न प्रतिपद्यते[१]।"

'रमणीयार्थ प्रतिपादकः शब्दः काव्यम्' इति परिभाषमाणः पण्डितराजोऽप्यमुमेवार्थं पुष्णाति। माघोऽप्याह—"शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते[२]।" आनन्दवर्द्धनोऽपि—"योऽर्थस्तद् व्यक्ति सामर्थ्ययोगी शब्दश्च कश्चन। यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः[३]" इति वदन् काव्यगत शब्दार्थयोरन्यवैलक्षण्यं प्रतिपादयति।

प्रायः सर्वैरेव शास्त्रकारैः शब्दार्थयोर्विवेचनं कृतमस्ति, किन्तु निरुक्ते तथा व्याकरणे शब्दार्थयोर्विवेचनस्य प्रामुख्यं विद्यते। निरुक्तकारो महर्षिर्यास्कः समस्तं पदजातं नामाख्यातोपसर्ग निपातेति भागचतुष्टये विभाजितवानस्ति। तेनार्थस्यातिपरोक्ष, परोक्ष-प्रत्यक्षेति तिस्रो वृत्तयः स्वीकृताः सन्ति[४]। महर्षिः पतञ्जलिर्दार्शनिको वैयाकरणः भर्तृहरिरपि शब्दार्थ विवेचने यास्कमतमनु सरतः। काव्याचार्येष्वनुमानवादी महिमभट्टोऽपि महाभाष्यकारं भर्तृहरिं चानुव्रजन् समस्तं पदजातं नामाख्यातोपसर्गनिपातेति भागचतुष्टये विभाजितवानस्ति तथा नाम पदस्य जाति-गुण-क्रिया-द्रव्येति-भेद चतुष्टयं प्रतिपादितवानस्ति।

परन्तु काव्य शास्त्रस्य प्रावतनाचार्येण भामहेन शब्दार्थयोः स्वरूपनिरूपणे तयोर्भेदानां प्रदर्शने च स्वीयाऽभिरुचिर्न दर्शिता। स 'केशब्दाः, केचतदर्थाः' इति कथनं कठिनं मन्यते। तस्य मते द्रव्य-क्रिया-जाति-गुण-भेदेन शब्दाश्चतुर्विधाः। यथाह सः—

'के शब्दाः के च तद्वाच्या इत्यहो वर्त्म दुस्तरम्।
द्रव्य-क्रिया-जाति-गुण भेदात् ते च चतुर्विधाः॥

१. वक्रोक्ति जीवितम् १।६ वृत्तिः।
२. शिशुपालवधम्, २।८६
३. ध्वन्यालोकः, १।८
४. यास्कस्यैतास्तिस्रोऽर्थवृत्तय काव्याचार्याणां क्रमशो व्यञ्जना-लक्षणाऽभिधेति वृत्तित्रयकल्पनाया मूलं प्रतिभाति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदृच्छा शब्दमन्ये डित्थादि प्रतिजानते ।"[१]

रुद्रटेनाऽपि काव्यालंकारे वाचक शब्दस्य एतएव चत्वारो भेदा वर्णिताः सन्ति[२]। आनन्दवर्द्धनस्तु शब्दार्थयो र्विवेचनं केवलं ध्वनेः कृते उपादेयं मन्यते। काव्याचार्येषु केवलेन महिम भट्टेन स्वीये व्यक्ति-विवेके शब्दार्थयो स्तथा तयोः सम्बन्धस्य विस्तृतं विवेचनं कृतमस्ति। तस्य विवेचन पद्धति र्व्याकरण शास्त्रं न्याय शास्त्रं चाधारत्वेनाश्रयति। महिम भट्टेन 'बहुधा व्याकृतः सोऽन्यैः[३]" इत्युक्त्वा आनन्दवर्द्धनेनोपे-क्षितस्य शब्दार्थ विवेचनस्यैका नवीना परम्परा प्रचालिता। या मम्मट-प्रभृतिभिराचार्यै रपि स्व विवेचन पद्धतौ गृहीताऽस्ति।

महिमभट्टात् परं भोजेनापि श्रृंगार प्रकाशे प्रारम्भिकेषु षट्सु प्रकाशेषु शब्दार्थयो र्विस्तृतं विवेचनं कृतम्, किन्तु तस्य विवेचनमधिकां-शतो व्याकरण शास्त्रमाधरति, काव्यशास्त्रस्याधारस्तेनाऽल्पीयस्त्वेन गृहीतोऽतस्तदनन्तरवर्त्तिना मम्मटेनाऽपि तस्मै किमपि महत्वं न प्रदत्तम्।

मम्मटस्य शब्दार्थविवेचनं विशुद्धं काव्यशास्त्रीयमस्ति। यद्यपि सोऽपि वैयाकरण आसीत्। स्वकीये विवेचने तेन सर्वत्र व्याकरणशास्त्रस्य मान्यता प्रमाणत्वेन गृहीताऽस्ति। शब्दार्थविवेचनेऽपि तेन 'गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः' इति महाभाष्यमुद्धरता 'शब्दानां प्रवृत्ति निमित्तं चतुर्विधम्' इति महाभाष्यकाराशयमनुसरता संकेतग्रह विषयीभूतस्यार्थस्य 'जातिरूपोऽर्थः, गुणरूपोऽर्थः, क्रियारूपोऽर्थः' यदृच्छा (संज्ञा) रूपोऽर्थः इति चातुर्विध्यं प्रदर्शितम्। भामह-रूद्रट-महिमभट्टादि-भिरपि महाभाष्यकाराशयमेवानुवदद्भिरुपाधेः (विशेषणस्य-जात्यादेः) चातुर्विध्यात् शब्दानां जाति-गुण-क्रिया-यदृच्छेति चातुर्विध्यं प्रतिपादितम्। किन्तु ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च मम्मटस्य मनोऽत्र नारभत।

---

१. काव्यालंकारः, ६।२०, २१

२. काव्यालंकारः, ७।१

३. ध्वन्यालोकः, १।३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स विभिन्नशास्त्रैर्मान्यतां प्रापिताः शब्दशक्तीराधृत्य काव्यशास्त्रीय-दृष्ट्या शब्दार्थयोः स्वरूपं निरूपितवानस्ति। काव्यशास्त्रे शब्दार्थनिरूपणस्य सुव्यवस्थितरूपप्रदाने मम्मट एव प्रथमं सम्मानमर्हति। अभिधा-लक्षणा-व्यञ्जनेतिशक्तित्रयमाधृत्य तेन शब्दस्य वाचक-लाक्षणिक-व्यञ्जकेतिभेदत्रयम्, अर्थस्य च वाच्य-लक्ष्य-व्यङ्ग्येति भेदत्रयं प्रतिपादितम्। तस्य मते शब्दस्योपर्युक्तास्त्रयो भेदाः काव्य एव सम्भवन्ति। यथाह सः—"स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा[1]।" शब्द-शक्तीनांतिसृणां सर्वशास्त्रीया मान्यता नास्ति; अत एव तेन तत्र वृत्तौ प्रोक्तण्—'अत्रेति काव्ये त्रिधा।' मम्मटः 'त्रिधा' पदेन शब्दस्य न, अपितु तस्योपाधीनां त्रैविध्यं स्वीकरोति। तस्य मते उपाधिभेदादेक एव शब्दः कदाचिद् वाचकः, कदाचिल्लाक्षणिकः, कदाचिद्-व्यञ्जकोऽपि भवितुमर्हति। यथा 'गङ्गायां घोषः' इत्यत्र गङ्गाशब्दो वाचको लाक्षणिको व्यञ्जकश्च।

अर्थानां सम्बन्धेऽपि काव्यशास्त्रीया विशिष्टा मान्यताऽस्ति प्रायः सर्व एवार्था व्यञ्जकाभवन्ति। यथाह मम्मटः "सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते[2]।' व्यञ्जनाविरोधिनो महिम भट्टस्य धारणा एतद् विपरीता वर्तते—"शब्दस्यैकाऽभिधा शक्तिरर्थस्यैकैव लिङ्गता।' न व्यञ्जकत्वमनयोः समस्तीत्युपपादितम्[3]॥"

शब्दस्य कुत्र शक्तिरित्यत्र शास्त्रकाराणां महान् मतभेदो दृश्यते। स च यथा—"शक्तिर्द्विधा—अनुभाविका स्मारिका च। तत्राद्या कार्यत्वान्विते, द्वितीया तु जातौ' इति प्राभाकराः। 'तत्र गवादिपदानां जात्याकृतिविशिष्टव्यक्तौ शक्तिरिति नैयायिकाः। जात्याकृतिव्यक्तिषु तिसृषु शक्तिरिति वैयाकरणाः। जातावेव शक्तिर्व्यक्तेर्भानं त्वाक्षेपादिना इति भाट्टादयः। जातौ व्यक्तौ चोभयत्र शक्तिः, किन्तु जात्यंशे ज्ञाता व्यक्त्यंशे

१. काव्यप्रकाशः, का० ६

२. काव्यप्रकाशः, का० ७

३. व्यक्तिविवेकः, १।२७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वरूपतः प्रत्यायिकेति प्राभाकरमतम् । अथ शक्त्या जात्याकृत्योरेकतर विनिर्मोकेणापरभानविरहात् लाघवाच्चोभयत्र गवादिपदस्यैकैव शक्तिः स्वीक्रियते । यत्र केवलाकृतिविशिष्टे गवादिपदतात्पर्यं, यथा पिष्ठकमय्यो गाव इत्यादौ तत्र लक्षणैव । जात्याकृतिविशिष्टायां व्यक्तौ शक्तेरैक्यम्, 'जात्याकृति व्यक्तयस्तु पदार्थ' इति न्यायसूत्रे बहुवचनमुपेक्ष्य 'पदार्थ' इत्यत्रैकवचनं निर्दिष्टवतो महर्षेरप्यनुमतम्' इति गदाधरभट्टाचार्यः[1] । शक्तेश्चतुर्विधविषयत्वात् जाति-द्रव्य-गुण-क्रियेति चतुर्धा शक्तिरित्यालंकारिकाः । यथाह दण्डी – "शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः । चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विधः ।" (काव्यादर्शः) भर्तृहरिरप्याह—"संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च ।" (वाक्यपदीयम्)

महाभाष्यकारस्य सम्मतिं प्रदर्शयता मम्मटेनाप्यत्र प्रोक्तम्— 'संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा[२] ।' अत्र जात्यादिरिति पक्षो महाभाष्यकारसम्मतः । 'जातिरेववा' इति पक्षः पूर्वमीमांसाऽभिमतः। गदाधरभट्टाचार्योऽप्याह—"मीमांसकास्तु—गवादिपदानां जातिरेव-वाच्या, न तु व्यक्तिराकृतिर्वा ।" (शक्तिवादे मीमांसकमतम्) शब्दस्य जातिवाचकत्वं न्यायमञ्जरीकारो जयन्तभट्टोऽपि समर्थयति—"शब्दः प्रथमतरं गोत्वेभवितुमर्हति, नागृहीतविशेषणा विशिष्टे बुद्धिरिति न्यायात्[३] ।' अर्थादगृहीतगोत्वरूपविशेषणा बुद्धिर्विशिष्टे (गोरूपव्यक्तौ) न प्रवर्त्तते । एवं सति महाभाष्यकारमते उपाधावेव शक्तिः, मीमांसकमते जातावेव शक्तिस्तदा कथं व्यक्तेर्भानमिति नाशङ्कनीयम् । व्यक्त्यविनाभावित्वाज्जात्या व्यक्तेराक्षेपाद् व्यक्तेर्भानं सुकरम् । उपादानलक्षणायाः प्रसङ्गे मम्मटेनापि मीमांसकसम्मतिं निर्दिशता प्रोक्तम्—'गौरनूबन्ध्यः' इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते ।'

मम्मटेन संकेतितार्थस्य सम्बन्धे महाभाष्यकारस्य जात्यादिरिति मतं तथा पूर्वमीमांसकानां जातिरेवेति मतमुद्धरता प्रसङ्गेऽस्मिन् न्यायदर्शनाभि-

१. शक्तिवादे 'स्वपदस्य' विवेचने ।

२. न्यायमञ्जरी, पृ० २९२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मतस्य जातिविशिष्टरूपस्यार्थस्य 'तद्वान्' इति शब्देन तथा बौद्धदर्शन सम्मतस्यापोहरूपस्याथवा अतद्व्यावृत्तिरूपस्यार्थस्य निर्देशः कृतोऽस्ति— 'तद्वानपोहो वा शब्दार्थ इति कैश्चिदुक्तः' इत्यादि। अस्यायमभिप्रायः— व्यक्तिविशेषमनुपादाय 'तद्वान्' सामान्यतो 'जातिमान्' शब्दार्थ इति नैयायिकमतम्। यथाह काव्यप्रदीपकारः—'न व्यक्तिमात्रं शक्यं न वा जातिमात्रम्। आद्ये आनन्त्याद् व्यभिचाराच्च। अन्त्ये व्यक्ति प्रतीत्यभाव प्रसङ्गात्। न चात्राक्षेपाद् व्यक्तिप्रतीतिरिति वाच्यम्। तथा सतिवृत्त्यनुपस्थितत्वेन शाब्दबोधविषयत्वानुपपत्तिः। तस्माज्जातिविशिष्टे एव सङ्केतः।' न्यायमञ्जरीकारोजयन्तभट्टोऽप्याह—'न जातिः पदस्यार्थो भवितुमर्हति...... जातौ प्रातिपदिकार्थे विभक्त्यर्थः कारकं लिङ्गं संख्या चैतत् त्रितयं युगपन्नान्वेति, न जातिः कारकम्, न च जातेः स्त्रीपुंनपुंसक विभागः, न चास्या द्वित्वादियोगः, ... जातेस्तु साक्षान्न मनागपि व्यापारलेश संस्पर्श इति स्वतो दुर्लभं तस्याः कारकत्वम्। अतः कथं तत्र विभक्त्यर्थान्वयः।...... तस्मात् तद्वानेव पदार्थः[२]।" ततस्तेन 'ननु कोऽयं 'तद्वान्' नाम तदस्यास्तीति तद्वानिति विशेष्य एव सामान्यवानुच्यते' इति तद्वानित्यस्य व्याख्यां कुर्वता 'तदेवं गवादिशब्दानांतावत् तद्वानर्थ इति सिद्धम्' इति स्थिरीकृतम्। ततश्च 'व्यक्तेरेव पदार्थत्वं तस्मादभ्युपगम्यताम्', 'तथा च बुद्धिस्तत्रैव श्रुतशब्दस्य जायते' इत्यादिना निष्कर्षरूपेण जातिविशिष्ट व्यक्तिवादस्य समर्थनं कुर्वन् स प्राह—'तस्मात् तद्वानेव पदार्थः' इति।

मम्मटोऽप्यत्र न्यायमञ्जरीकारस्यमतं 'तद्वानेव पदार्थः' इति 'तद्वान्' इति शब्देन निर्दिष्टमस्ति।

बौद्धदर्शनाभिमतस्यापोह सिद्धान्तस्य न्यायमञ्जर्यामुपस्थापनं निराकरणं च विस्तरतो वर्णितमस्ति[१]। जातेरदृष्टत्वेन विचारासहत्वाद् व्यक्तेश्च क्षणिकत्वादानन्त्यादिदोषाच्च उभयत्र संकेतस्य कर्तुम-

१. न्यायमञ्जरी, पृ० २६४-२६५

२. ,, पञ्चमाह्निकम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्यत्वाद् गवादिशब्दानामगवादिव्यावृत्तिरूपोऽपोहोऽर्थ इति बौद्धानां (क्षणभङ्गवादि बौद्धानाञ्च) मतम्। मम्मटेन मतस्यास्य केवलं निर्देशमात्रं कृतम्। एवं विधा अन्येऽपि शब्दस्य सङ्केतितार्थाः सम्भवन्ति, किन्तु ते ग्रन्थगौरवभयात् प्रकृतानुपयोगित्वाच्च न प्रदर्शिता मम्मटेन।

मम्मटेनार्थनिरूपणप्रसङ्गे तात्पर्यार्थवादिनामभिहितान्वयवादिमीमांसकानां तथा वाक्यार्थवादिनामन्विताभिधानवादिमीमांसकानामुल्लेखः कृतोऽस्ति। अभिहितान्वयवादिनस्तात्पर्याख्यांवृत्तिं मन्यन्ते, तात्पर्यार्थमर्थाद् वाक्यार्थमप्यभिधयैव बोध्यं वाच्यार्थं मन्यमाना अन्विताभिधानवादिनस्तु न इति द्विविधमीमांसकानामेषां मतवैभिन्न्यम्। मीमांसकानां मतद्वयमिदं न्यायदर्शनाभिमतं न। यथाह न्यायमञ्जरीकारोजयन्तभट्टः—

"मतद्वयमपीदं तु नास्मभ्यं रोचतेतराम्।
कुतोऽन्विताभिधानं वा कुतो वाऽभिहितान्वयः[1] ॥"

मम्मटेनार्थं निरूपणे प्रसङ्गत उभयविधानां मीमांसकानां वाक्यार्थ विषयकं मतद्वयं यदुल्लिखितं तस्याभिप्रायद्वयम्—प्रथमस्तावत् स समेषां शास्त्राणां शब्दार्थ सम्बन्धिमान्यतानां विश्लेषणं कृत्वा स्वकीयं शब्दार्थ विवेचनं सर्वशास्त्रीयदृष्ट्या परिपूर्णं कर्तुमभिवाञ्छति। द्वितीयस्तावत् स मीमांसकैर्व्यञ्जना वृत्तेः स्थाने स्वीकृतां तात्पर्याख्यांवृत्तिं स्वस्य व्यञ्जना निरूपणस्याधारं निर्मातुमिच्छति। मम्मटस्य तात्पर्यवृत्तिरभिमताऽस्तीति ध्वनिवादिनोऽभिनवगुप्तस्य—'तस्मादभिधातात्पर्यलक्षणाव्यतिरिक्तश्चतुर्थोऽसौ व्यापारो ध्वनन-द्योतन-व्यञ्जन-प्रत्यायनावगमनादि सोदरव्यपदेश निरूपितोऽभ्युपगन्तव्यः[2]' इति मान्यतामनुरसतस्तस्य—'अभिधातात्पर्य-लक्षणात्मक व्यापारत्रयातिवर्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव[3]' इत्युक्त्या प्रतीयते।

शब्दार्थसम्बन्धः, अथवा संकेतग्रहः (संकेतज्ञानम्)—

शब्दानामर्थैः सहैको विशेषः सम्बन्धोऽस्ति येन शब्दानामर्थज्ञान

१. ,, पृ० ३७०
२. ध्वन्यालोकलोचनम्, चौ० सं पृ० ६०
३. काव्य प्रकाशः, का० १२ वृत्तिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिपद्यते । शब्दार्थयोस्तस्य सम्बन्धस्य विवेचनं यद्यपि मुख्यतया व्याकरण-शास्त्रस्य विषयोऽस्ति, तथाप्यन्य शास्त्रेष्वपि प्रसङ्गतः शब्दार्थयोः सम्बन्ध-स्य विवेचनंकृतमस्ति । शब्दश्रवणादर्थसम्प्रत्ययः, अथवा अर्थेन सह शब्दस्य सम्बन्ध एष विषयो दार्शनिकोऽस्ति । वैशेषिक दर्शनस्य 'सामयिकः शब्दार्थसम्प्रत्ययः' इति सूत्रं (७।२।२०) प्रमाणयति यत् शब्दादर्थसम्प्रत्ययः सामयिकः (संकेतितः) अस्ति । 'न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य' (२।२।२५) इति न्यायदर्शनस्य सूत्रमपि अमुमेवार्थं पुष्णाति यत् शब्दार्थज्ञानं समयस्य (संकेतस्य) अधीनमस्ति । न्यायमञ्जरीकारोजयन्तभट्टोऽपि शब्दादर्थज्ञानं समयाधीनं मन्यते । यथाह सः—'कस्तर्हि समय इति ब्रूमः । कोऽयं समयो नाम, अभिधानाभिधेयनियमनियोगः समय उच्यते[1] ।' अर्थाद् वाच्यवाचकभावरूपोनियमनियोग एव समयः (संकेतः) कथ्यते । शब्दार्थ सम्बन्धस्य नित्यतां निराकुर्वताऽपितेन प्रोक्तम्—'समयमन्तरेणार्थप्रति-पत्तेरसिद्धेः, सिद्धे च समये तत एवार्थसिद्धेः, किं नित्यसम्बन्धाश्रयेण ।' समयस्य पुरुषाधीनत्वमस्वीकुर्वता तथा वृद्धव्यवहारलब्धतद्व्युत्पत्ति सा-पेक्षत्वमप्यङ्गीकुर्वता तेन निष्कर्षरूपेणोक्तम्—'तस्मादीश्वर विरचित-सम्बन्धाधिगमोपायभूतवृद्धव्यवहारलब्धतद्व्युत्पत्तिसापेक्षः शब्दोऽर्थमवगम-यतीति सिद्धम् ।"

उपर्युक्त विवेचनेनेदं सुस्पष्टं यत् शब्दात् तदर्थ बोधः सङ्केतज्ञान-मपेक्षते । काव्यशास्त्रिभिर्नैयायिकानामेव संकेतग्रहः स्वीकृतोऽस्ति । आचार्यमम्मटो न्यायशास्त्रस्येमां मान्यतामेवाधृत्य 'वाचक' शब्दस्य लक्षणं कृतवानस्ति–'साक्षात्संकेतितमर्थमभिधत्ते स वाचकः[2]' इति । अस्याः कारिकाया वृत्तौ तेन प्रोक्तं यत् लोकव्यवहारे संकेतज्ञानं विना शब्दादर्थ प्रतीतिर्न भवति । संकेतज्ञानस्य साहाय्येनैव शब्दोऽर्थविशेषं प्रतिपादयति । 'समयः=संकेतः' इति मम्मटस्याप्यभिमतम् । यथाह सः---'नाभिधा समया-भावात्[3]' इति कारिकायाम् ।

१. न्यायमञ्जरी, चतुर्थ माह्निकम् ।
२. काव्य प्रकाशः, का० ७
३. काव्य प्रकाशः, का० १७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दशक्तिः—नैयायिका ईश्वरेच्छामीश्वर सङ्केतं वा शक्ति मन्यन्ते । यथाह परमतार्किकोऽन्नम्भट्टः— "अस्मात् पदादयमर्थो बोद्धव्यः' (अथवा-अयं शब्दोऽस्यार्थस्य बोधको भवतु) इतीश्वरसंकेतः (ईश्वरेच्छा) शक्तिः[१] ।" गदाधरभट्टाचार्योऽप्याह-"इदं पदमिममर्थं बोधयत्विति, अस्माच्छब्दादयमर्थो बोद्धव्य इति वाइच्छा संकेतरूपा **वृत्तिः** । तत्राधुनिकसंकेतः **परिभाषा**, यथा-शास्त्रकारादिसंकेतितं नदीत्यादि पदम् । ईश्वर संकेतः **शक्तिः** ।"[२]

न्याय शास्त्रे शक्तिः, समयः, संकेतश्चेतित्रयं प्रायः पर्यायवाचित्वेन गृहीतमस्ति । त्रय इमे शब्दार्थयोर्वाच्यवाचक भावरूप सम्बन्धस्यबोधकाः सन्ति । नैयायिकानां नये 'पदजन्य पदार्थस्मरणं व्यापारः । शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । ते संकेतग्रहेतिपदस्य स्थाने शक्तिग्रहेति पदमपि प्रयुञ्जते । यथाह विश्वनाथ पञ्चाननः-'शक्ति ग्रहं व्याकरणो-पमान ·····इत्यादि ।'[३] प्राचीनन्याये ईश्वरेच्छारूपः संकेतः शक्तिः, नव्य न्यायमते च इच्छामात्रं शक्तिः ।

काव्यशास्त्रे यद्यपि समय-संकेतयोरपार्थक्यं स्वीकृतमस्ति, तथापि शक्ति स्ताभ्यामतिरिक्तः पदार्थ इति काव्यशास्त्रकाराणां मतम् । एतच्च 'साक्षात्संकेतितार्थबोधजनको व्यापारोऽभिधा । संकेतश्च शक्तिग्राहकः समयः, इत्यभिप्रायवता मम्मटेनाभिधाशक्तिनिरूपणकारिकायाम् (का.८), नागेशेन च 'नाभिधा समयाभावात्' इति काव्यप्रकाशकारिकायाः (का. १७) उद्योतटीकायां स्पष्टीकृतम्—'शक्तिरतिरिक्तः पदार्थः, तद्-ग्राहकः संकेतः' इत्यादि ।

शक्तिः संकेतो न, अपितु सा संकेतग्राह्या, अतस्तयोः पार्थक्यमित्यत्र मीमांसकानां वैयाकरणानाञ्चैकमत्यम् । यथाहुर्मीमांसका अभिधानिरूपणे

१. तर्क संग्रहः, ४।१

२. शक्तिवादे स्वपदविवेचने । अत्र गदाधरेण वृत्तिः, परिभाषा, शक्तिरिति तिसृषु पार्थक्यमपि प्रदर्शितम् ।

३. न्याय सिद्धान्त मुक्तावली, का० ४।२१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'संकेतग्राह्यं शक्त्याख्यपदार्थान्तरमभिधा।' नागेशोऽपि ब्रूते-'उक्त ईश्वर संकेत एव शक्तिरिति नैयायिक मतं न युक्तम्। 'अयमेतच्छक्यः, अत्रास्य शक्तिः, इत्यस्य संकेतस्य पार्थक्येन प्रसिद्धत्वात्। अत एव व्याकरण शास्त्रे 'ईश्वरेच्छा शक्तिः, सैव संकेतः सम्बन्धः' इति नैयायिकमतिर्नाङ्गीक्रियते। सम्बन्धस्य द्विष्ठत्वात्, इच्छायाश्च पदेतदर्थे वाऽसत्वात्। तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया। तद्ग्राहकं चेतरेतराध्यासमूलकं तादात्म्यम्, तदेव सम्बन्धः। तदुक्तं महाभाष्ये-'संकेतस्तु पदपदार्थयोरितरेतराध्यासरूपः, स्मृत्यात्मकः, योऽयं शब्दः सोऽर्थो योऽर्थः स शब्द इति।' 'स्मृत्यात्मकः' इत्यनेन ज्ञातस्यैव संकेतस्य शक्तिबोधकत्वं दर्शितम्।"[१]

तात्पर्यमिदं यत्-सम्बन्धो द्विविधः, ईश्वरेच्छारूपः, तादात्म्यरूपश्च। आद्यो न्यायशास्त्र प्रसिद्धः, अन्यो व्याकरणशास्त्र प्रसिद्धः। नैयायिकानां मते इच्छारूपायाः शक्तेः पदेऽर्थे च विषयत्व लक्षणस्य सम्बन्धस्य, तथा वैयाकरणानां मते इतरेतराध्यासस्य कल्पना आवश्यकी।

काव्यशास्त्रे वृत्तिः शक्ति व्यापारश्चेति त्रयमपि पर्यायवाचित्वेन व्यवहृतमस्ति। अन्यत्र क्वचिद् वृत्तेः स्थाने शक्तेः, शक्तेः स्थाने च वृत्तेः प्रयोगो दृश्यते। क्वचिच्च शक्ति र्वृत्तेः स्वतन्त्रभेदत्वेन गृहीताऽस्ति। वृत्ति-व्यापारेत्युभयं समानार्थकत्वेन सर्वैर्गृहीतमस्ति। व्यापारः क्रियाद्यपर पर्यायो व्याकरणशास्त्र सम्मतः। 'व्यापारो भावना सैवोत्पादना सैव च क्रिया' इति भर्तृहर्युक्तौ भावयितुरुत्पादनक्रिया व्यापारः। विषयेन्द्रिय संयोगो व्यापारो यथा न्याय शास्त्रे तथैव शब्दार्थ सम्बन्धो व्यापारः (शक्तिः) व्याकरणशास्त्रे। मम्मटेन व्यापारस्यार्थे क्रिया शब्दोऽपि-व्यवहृतः, यथा-लक्षणानिरूपणे 'लक्षणाऽऽरोपित क्रिया' इत्यादि। शक्तेस्तु अर्थ बोधन सामर्थ्यरूपोऽर्थः, अथवा अर्थबोधनानुकूल व्यापार-रूपोऽर्थः सर्वैरेव गृहीतः। नैयायिकानां मीमांसकानां वैयाकरणानां च

१. परम लघु मञ्जूषा, शक्ति निरूपणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मते शक्तिरेकस्मिन् विशेषेऽर्थेऽपि गृहीताऽस्ति । नैयायिकानां नये शक्तिः- 'अर्थबोधानुकूलः पदपदार्थंसम्बन्धः । स च इदं पदमिममर्थं बोधयतु, अस्माच्छब्दादयमर्थो बोद्धव्य इत्येवंरूपः इच्छात्मकः संकेतः । मीमांसकास्तु अभिधानाम पदार्थान्तरं संकेतग्राह्यंशक्तिरित्याहुः । अर्थात् मीमांसकानां मते शक्तिरतिरिक्तः पदार्थ, स्तथा साऽभिधाऽपरपर्यायाऽस्ति । सा च शक्ति स्त्रिधा-रूढिर्योगो योगरूढिश्च । आद्या घटादिपदेषु, द्वितीया पाचकादौ, तृतीया पङ्कजादि पदेषु । परमलघुमञ्जूषायां (शक्तिनिरूपणे) नागेशोऽप्याह-'शक्ति स्त्रिधा, रूढिर्योगोयोगरूढिश्च । तत्र रूढिर्यथा मणिनूपुरादौ, योगोयथा पाचकादौ, योगरूदिर्यथा पङ्कज पदे ।'

वैयाकरणानां प्राञ्चोऽपि 'वृत्तिश्च शक्तिलक्षणान्यतररूपा' इति निगदन्तः शक्तिमभिधापरपर्यायां मन्यन्ते । नव्यवैयाकरणेन नागेशेन शक्तेस्त्रैविध्यं प्रतिपादितमस्ति । शाब्दबोधे 'तद्धर्मावच्छिन्नविषयक शाब्द बुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः' इत्याद्युपक्रमता तेन लिखितम्-'सा च वृत्तिस्त्रिधा-शक्तिर्लक्षणा व्यञ्जना च ।' अत्र नागेश आलंकारिकैः प्रभावितः प्रतिभाति । वस्तुतः, शक्तित्रयस्य सर्व शास्त्रीया मान्यता नास्ति । अभिद्यां तु सर्व एव मन्यन्ते, किन्तु लक्षणां केवलं वैयाकरणाः, मीमांसकास्तथा आलंकारिका एव मन्यन्ते । प्राचीना नैयायिका बौद्ध दार्शनिकाश्च लक्षणां न मन्यन्ते । नव्यास्तु लक्षणां स्वीकुर्वन्ति । व्यञ्जनां तु केवंलमालंकारिका एव मन्यन्ते तथा तां सर्वोच्चस्थाने स्थापयन्ति । वृत्तिदीपिकाकारेण मौनिश्रीकृष्णेन तिस्रो वृत्तयः स्वीकृताः सन्ति-शक्तिः, भक्तिः, व्यक्तिश्च । इमास्तिस्रः क्रमशः अभिधा, लक्षणा, व्यञ्जनाः सन्ति ।

अभिधा—अभिधा शब्दस्याग्रिमा शक्तिः । प्राचीनैर्वैयाकरणैरभिधायाः कृते शक्तेः प्रयोगः कृतोऽस्ति । तेषां मते वृत्तिर्द्विधा-शक्तिर्लक्षणा चेति । नैयायिकानां नये अभिधाशक्तिरीश्वरेच्छारूपा, अर्थादीश्वरोद्भाविताऽस्ति । मीमांसका अपि अभिधामीश्वरीयाम् (अलौकिकीं) शक्ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्यन्ते। तेषां मतेऽभिधा शब्दस्य स्वाभिविकी शक्तिर्लक्षणा तु लौकिी[१]। काव्यशास्त्री विश्वनाथोऽप्यभिधामीश्वरोद्भावितां शक्ति मन्यन्ते। यथाह स लक्षणानिरूपणे-"सा (लक्षणा) शब्दस्यार्पिता स्वाभाविकेतरा, ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम।" 'लक्षणाऽऽरोपितक्रिया' इति मन्यमानो मम्मटोऽपि अभिधां स्वाभाविकीं शक्तिं मनुते। तस्य मतानुसारं शब्दस्य संकेतितोऽर्थो मुख्यः, तस्यार्थस्य बोधिकाऽभिधाशक्तिरपि मुख्यो व्यापारः। यथाह सः— 'स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।' (का. प्र., का. ८) काव्यशास्त्रे सर्वप्रथमम् उद्भटः अभिधाव्यापारस्य स्पष्टत उल्लेखं कृतवानस्ति। भामहकृत काव्यालंकारस्य भामहविवरणेत्याख्यायां व्याख्यायां स भामहस्य 'शब्दश्छन्दोऽभिधानार्थाः' इत्यादिकारिकां[१] व्याचक्षाणो ब्रूते-'शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्चेति।' उद्भटस्यमते शब्दस्य व्यापारद्वयम् अभिधा गुणवृत्तिश्च। गुणवृत्तिर्लक्षणा। आनन्दवर्द्धनेन ध्वनेः प्रतिष्ठापन प्रसङ्गेऽभिधाया उपन्यासमात्रं कृतम्। तस्य मतेऽभिधाऽभिधानशक्तिस्तथा व्यञ्जनाऽवगमनशक्तिरस्ति-'नहि यैवाभिधानशक्तिः सैवावगमनशक्तिः।'[२]

शब्द शक्ति विचारे मम्मटो मुकुल भट्टेन विशेषतः प्रभावितो वर्त्तते। मुकुलभट्टोऽभिधां सर्वासां वृत्तीनां मातरं मन्यमानोऽभिधायाः प्रतिपादने स्वं प्रसिद्धं ग्रन्थम् अभिधावृत्तिमातृकाभिधं विरचितवानस्ति। मुकुलस्य मतानुसारं सर्वेभ्यः प्रतीयमानेभ्योऽर्थान्तरेभ्यः। लक्ष्यव्यङ्ग्यतात्पर्येभ्यः। पूर्वं प्रतीतिपथमागतोऽर्थः मुख्यः, तस्य प्रत्यायिका शक्तिरभिधा। शब्दस्य संकेतितार्थस्य मुख्यत्वे तेन युक्तिरपि प्रदर्शिता—"स हि यथा सर्वेभ्यो हस्तादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते, तद्वदेव सर्वेभ्यः प्रतीयमानेभ्योऽर्थान्तरेभ्यः पूर्वमवगम्यते। तस्मान्मुखमिव मुख्य इति

१. 'लक्षणायामप्यर्थवत्ता भवत्येव। लक्षणापि हि लौकिकी।' (जैमिनि सूत्रम् २२, तत्र शबरस्वामि कृतंभाष्यम्।

२. काव्यालंकारः, १।९

३. ध्वन्यालोकः, तृतीयोद्योतः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाखादियान्तेन[1] मुख्यशब्देनाभिधीयते[2] ।" मुकुलमेवानुसरता मम्मटेनाभिधायाः स्वरूपं निरूपितं तथा संकेतितार्थस्याभिधा व्यापारस्य च मुख्यत्वं प्रतिपादितम्—'स मुख्योऽर्थस्तत्रमुख्यो व्यापारोऽस्याभिधोच्यते' इति। मम्मट इव विश्वनाथोऽप्यभिधामग्रिमां शक्तिं मन्यते—'तत्र संकेतितार्थस्य वोधनादग्रिमाऽभिधा[3] ।"

लक्षणा—शब्दस्य द्वितीया शक्तिर्लक्षणा प्रायः सर्वैरेव शास्त्रकारैरङ्गीक्रियते। लक्षणाया मान्यताऽतीव प्राचीनाऽस्ति। महर्षियास्केन ब्राह्मण ग्रन्थेषु प्रायः सर्वत्र भक्तेः (लक्षणायाः) आश्रयणं स्वीकृतमस्ति-'बहुभक्तिवादीनि हि ब्राह्मण ग्रन्थानि भवन्ति।'

मीमांसकानां मतानुसारं लक्षणा लौकिकी शक्तिरस्ति—'लक्षणायामप्यर्थवत्तां भवत्येव। लक्षणापि हि लौकिकी[4]।' शबरस्वामिनोऽस्य कथनस्याशयोऽयं यत् लौकिकव्यवहारे लक्षणाया मान्यता आवश्यकी। अत्र शवरस्वामिना प्रोक्तम्—'कथं पुनः परशब्दः परत्र वर्त्तते। स्वार्थाभिधानेनेति ब्रूमः।' अर्थात् शब्दः स्वस्य मुख्यस्यार्थस्याभिधानद्वारा केनचित् कारणेन स्वार्थाद् भिन्नं कमप्यन्यमर्थं प्रतिपादयति। अमुमेवाशयमाश्रित्य कुमारिल भट्टेन लक्षणाया भेदद्वयं विहितमस्ति-रूढिः प्रयोजनं च। यथाह सः—"निरुढालक्षणाः काश्चित् सामर्थ्यादभिधानवत्। क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः' इत्यादि।

लक्षणा द्वारा शब्दोऽन्यार्थपरको भवतीति मीमांसाश्लोकवार्तिके प्रोक्तम्—

"सामर्थ्यसिद्ध्यदृष्टार्थप्रसङ्गात् तेन लक्षणा।
श्रुतार्थं तु परित्यज्य लक्षणार्थो विधीयते[5] ॥

---

१. शाखादिभ्योयः' इति पाणिनि सूत्रेण (५।३।१०३) मुखशब्दाद् प्रत्ययः।
२. अभिधावृत्ति मातृका-१
३. सा० ७, २।४
४. २२ तमे जैमिनि सूत्रे शबर स्वामि कृतं भाष्यम्।
५. जैमिनि सूत्रम् १।२६-२७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मीमांसकानां मते लक्षणायाः स्वरूपमस्ति—'अभिधेयाविनाभूत प्रतीतिर्लक्षणोच्यते ।' अर्थात् अभिधेयेन (मुख्यार्थेन) अविना भूतस्य सम्बद्धस्य) अर्थस्य प्रतीतिर्लक्षणा[1] । अत्र प्रतीति शब्दस्यार्थोऽस्ति प्रतीतेः कारण भूतः शब्द व्यापारः — 'प्रतीयतेऽर्थोऽनयेति प्रतीतिः, करणे क्तिन् । इत्थं लक्षणा प्रतोतिरर्थाद् ज्ञानं न, अपि तु प्रतीतेः कारणभूतः शब्द व्यापारोऽस्ति ।

लक्षणायाः शब्दव्यापारत्वेऽपि विदुषां मतभेदः । 'तद्भूर्लाक्षणिकः कथ्यते इति ब्रुवता मम्मटेन लक्षणायाः शब्दव्यापारत्वं स्वीकृतम् । मुकुलभट्टेनाभिधाया व्यापारद्वयं प्रतिपादितम्—मुख्यो लाक्षणिकश्च । मुख्यः शब्दस्य व्यापारः, लाक्षणिकोऽर्थस्य । उक्तञ्च तेन—शब्द व्यापारतो यस्य प्रतीतिस्तस्य मुख्यता । अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते ॥' शब्दव्यापाराद् यस्यार्थस्यावगतिस्तस्य मुख्यत्वम् । यस्य तु शब्दव्यापारावगम्यार्थपर्यालोचनयाऽवगतिस्तस्य लाक्षणिकत्वम् । (अभिधा वृत्तिमातृका) अप्पयदीक्षितेनापि लक्षणां लक्षयता तस्याः शब्दव्यापारत्वं स्पष्टीकृतम् । तद् यथा—'सा च मुख्यार्थसम्बन्धेन शब्दस्यार्थान्तर प्रतिपादकत्वम् ।' अर्थात् शब्दस्य मुख्यार्थेन सम्बद्धस्यान्यार्थस्य प्रतिपादकत्वं लक्षणा । (वृत्तिवार्त्तिकम्, १५)

न्यायदर्शनेऽपि लक्षणाया मान्यताऽतिप्राचीना । न्यायदर्शनकारो महर्षिगौंतमो लिखति—'सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्यो ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटकान्न-पुरुषेष्वतद्भावेऽपि तदुपचारः[2] ।' एष उपचारशब्दो लक्षणाया रूपरेखां प्रस्तौति । नैयायिकाः शक्यार्थेन (अभिधया बोधितेनार्थेन = मुख्यार्थेन) सह सम्बन्धं लक्षणां मन्यन्ते—'शक्यसम्बन्धो लक्षणा ।

---

१. अविनाभावस्यात्र सम्बन्धमात्रमर्थः, न त्वान्तरीयकत्वम्' इति मम्मटेनस्पष्टीकृतम् । (का० प्र० का० १२ वृत्तिः)

२. परमलघुमञ्जूषा, शक्तिनिरूपणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्यसम्बन्धेनाशक्यप्रतीतिर्लक्षणेति जरन्नैयायिकाः । शक्यसम्बन्धो लक्षणेति नवीनतार्किकाः।' परमलघुमञ्जूषायां (शक्ति निरूपणे) नागेशेनापि नैयायिकाभिमतलक्षणायाः स्वरूपं निर्दिष्टमस्ति । तद् यथा—'ननु लक्षणा कः पदार्थ इति चेत्, अत्र तार्किकाः—स्वशक्यसम्बन्धो लक्षणा । सा च द्विविधा-गौणी शुद्धा च ।......प्रकारान्तरेणापि सा द्विधा अजहत्स्वार्था, जहत्स्वार्था च......इत्यादि ।'

वैयाकरणा अपि लक्षणां स्वीकुर्वन्ति । तेषां मते वृत्तिर्द्विधा-शक्तिर्लक्षणा च । अर्थवत्सूत्रेऽर्थवत्त्वं परिष्कुर्वद्भिः प्राचीनैर्वैयाकरणैः प्रोक्तम्—'वृत्तिमत्त्वमर्थवत्त्वम्, वृत्तिश्च शक्तिलक्षणान्यतररूपा......इत्यादि । नागेशेन तु महाभाष्यकाराभिमतो लक्षणाया अभावोऽपि प्रदर्शितोऽस्ति । यथाह सः—"सति तात्पर्ये सर्वे सर्वार्थवाचकाः' इति भाष्याल्लक्षणाया अभावात् । वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवाज्जघन्यवृत्तिद्वयकल्पनाया अन्याय्यत्वाच्च । तात्पर्यमिदं यत् लक्षणास्वीकारे वृत्तिद्वयस्य कार्यकारणभावद्वयस्य कल्पनं क्रियते—शाब्दबोधं प्रतिशक्तिज्ञानजन्योपस्थितेर्लक्षणाज्ञानजन्योपस्थितेश्च कारणत्वे कार्यकारणभावद्वयकल्पनम्, तथा जघन्यवृत्तेरस्या लक्षणायाः कल्पनमन्याय्यञ्च भवति ।

अभिधालक्षणयोः पार्थक्यनिरूपणे न्यायपरिशुद्धिकारेण लक्षणा जघन्यवृत्तिः प्रतिपादिताऽस्ति, यथा—"शब्दशक्तिनिमित्ता सा (अभिधा) स्वार्थे मुख्याऽभिधीयते । स्वार्थाभिधानद्वारा स्याज्जघन्याऽर्थान्तिरे मता ।।"

(शब्दाध्यायः)

अर्थात् मुख्यार्थबोधनेऽभिधा शब्दस्य स्वाभाविकी शक्तिः, अर्थान्तरबोधने सैव जघन्यावृत्तिः कथ्यते ।

'गङ्गायां घोषः' इत्यत्र गङ्गाशब्दात् तीररूपार्थप्रत्ययोऽपि 'सति तात्पर्ये सर्वे सर्वार्थवाचकाः' इति सिद्धान्तबलात् सम्भविष्यति, अतो लक्षणा नाङ्गीक्रियते महाभाष्यकारेण । महाभाष्यकारमते शक्तिर्द्विधा—प्रसिद्धा,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अप्रसिद्धा च । आमन्दबुद्धिवेद्यत्वं प्रसिद्धत्वम्, सहृदयहृदयमात्रवेद्यत्वमप्रसिद्धत्वम् । इत्थं गङ्गाशब्दस्य प्रवाहे प्रसिद्धा शक्तिः, तीरे चाप्रसिद्धा शक्तिः । अत्र 'सति तात्पर्ये' इत्युक्त्या घटपदात् पटप्रत्ययो न भवति । तात्पर्यं चात्र ऐश्वरं देवतामहर्षिलोकवृद्धपरम्परातोऽस्माभिर्लब्धमिति भाष्याशयो नागेशेन वर्णितः[1] ।

'सर्वे सर्वार्थवाचकाः' इत्यस्याशयोऽयं यत् सर्वैरर्थैः सह सर्वेषां शब्दानां सम्बन्धः । ईश्वरसंकेतस्तु प्रकाशकः । अत एव 'नित्यः शब्दार्थसम्बन्धः' इति तान्त्रिकाः (वैयाकरणाः) । वाक्यपदीयकारोऽप्याह—

"नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ।'

निष्कर्षत उपर्युक्त विश्लेषणस्य तात्पर्यमिदं यत् लक्षणाशक्तेर्विचारोऽतीवप्राचीनः । काव्यशास्त्रे सर्वप्रथमम् उद्भटेन स्वकीयेभामहविवरणे अभिधागुणवृत्तीतिव्यापारद्वयस्योल्लेखः कृतोऽस्ति[2] । उद्भटमतेऽभिधाव्यापारस्यैव भेदद्वयम्—मुख्यो गुणवृत्तिश्च। वामनेन वक्रोक्तेर्विचारे लक्षणायाः संकेतमात्रं कृतम्—'सादृश्याल्लक्षणा वक्रोक्तिः[3]' इति । आनन्दवर्द्धनो ध्वनिप्रतिष्ठापनप्रसङ्गे लक्षणां भक्ति-गुणवृत्त्युपचरितेतिनामत्रयेणाभिहितवानस्ति । अभिनवगुप्तेनानन्दवर्द्धनस्याशयं प्रकटीकुर्वता प्रोक्तम्—'मुख्यार्थस्य भङ्गो भक्तिरित्येवं मुख्यार्थबाधा निमित्तं प्रयोजनमितित्रयसद्भाव उपचारबीजम् ।......त्रितयसन्निधौ हि लक्षणा प्रवर्त्तते......... इत्यादि[4] ।' अभिनवगुप्तस्यास्यां व्याख्यायां लक्षणायास्त्रीण्यङ्गानि निर्दिष्टानि सन्ति—मुख्यार्थबाधः, सम्बन्धः, प्रयोजनं चेति । आचार्यमम्मटः

१. नागेशेन निर्दिष्टमिदं भाष्यं कुत्रत्यमित्यन्वेष्टव्यमस्ति ।

२. 'शब्दानामभिधानमभिधा व्यापारो मुख्यो गुणवृत्तिश्चेति ।" (भामहस्य "शब्दश्छन्दोऽभिधानार्थाः' इति कारिकांशस्य व्याख्या)

३. काव्यालंकारसूत्रवृत्तिः' ४।३।८

४. ध्वन्यालोकलोचनम्, १।४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मीमांसकानां लोकव्यवहारेऽनुस्यूतां लौकिकीं (रूढि) लक्षणां तथाऽभिनवगुप्तस्य भक्तिविवेचनमाधृत्य लक्षणाया निष्कृष्टं स्वरूपं निरूपितवानस्ति—

"मुख्यार्थबाधे तद्योगेरूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपित क्रिया[५] ।।"

मम्मटस्य मतानुसारं मुख्यार्थबाधः, तद्योगः मुख्यार्थेन सहसम्बन्धः, रूढिरथवा प्रयोजनमिति त्रीणि लक्षणाया अङ्गानि । तत्र 'मुख्यार्थबाधः' लक्षणाया बीजम् । मुख्यार्थबाधस्याशयं स्पष्टी कुर्वता काव्यप्रकाश प्रभाटीकाकारेण वैद्यनाथेन लिखितम्—'मुख्यार्थबाधश्च शक्यतावच्छेदकरूपेण तात्पर्यविषयान्वयबाधः ।' काव्यप्रदीपोद्योतटीकाकारस्य नागेशस्य मते मुख्यार्थबाधस्यार्थद्वयम्—अन्वयानुपपत्तिः, तात्पर्यानुपपत्तिश्च । नैयायिकानां मतेऽन्वयानुपपत्तिर्लक्षणाया बीजम् । नागेशस्तु तात्पर्यानुपपत्तिं लक्षणाया बीजं मन्यते । 'नक्षत्रं दृष्ट्वा वाचमुत्सृजेत्' इति वाक्यं तात्पर्यानुपपत्तेरुदाहरणत्वेनोपन्यस्यता तेन प्रोक्तम्—'नक्षत्रं दृष्ट्वा वाचमुत्सृजेदित्यत्रान्वयसम्भवेपि तात्पर्यानुपपत्त्यैव लक्षणास्वीकारात् । एकानुगमस्वीकारेण निर्वाहेऽनेकानुगमस्वीकारे गौरवात् ।" प्रौढमनोरमायामपीदं स्पष्टीकृतम् ।

शब्दशक्तिविचारे मम्मटेन मीमांसकस्य मुकुलभट्टस्य 'अभिधावृत्तिमातृका' ग्रन्थो, विशेषतया, आधारत्वेन गृहीतोऽस्ति । मम्मटो विषयस्य प्रतिपादने उदाहरणानि वैयाकरणानां गृहीतवानस्ति । परन्तु प्रसङ्गवशतो यत्र यत्र तेन मीमांसकानां मतान्युद्धृतानि, तानि मुकुलभट्टस्य मतैः साम्यं बिभ्रति । मुकुलेन स्वविवेचने मीमांसकमतानाधारो गृहीतोऽस्ति । यद्यपि मम्मटेन कुत्रापि मुकुलस्य नामनिर्देशो न कृतः; तथापि काव्यप्रकाशस्याभिधावृत्तिमातृकायाश्च पङ्क्तीनां तुलनात्मकं समीक्षणं प्रमाणयति यत् शब्दशक्तिविवेचने मम्मटो मुकुलस्य ऋणाधिक्यं धारयतीति ।

५. काव्यप्रकाशः, का. ९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यञ्जना—साहित्यशास्त्रे व्यञ्जनावृत्तेः प्रतिष्ठापना एका महत्त्वपूर्णा उपलब्धिः । शास्त्रेऽस्मिन् व्यञ्जना शब्दस्य तृतीया शक्तिरङ्गीकृताऽस्ति तथा व्यङ्ग्यार्थस्य स्वतन्त्रा सत्ता स्वीकृताऽस्ति । व्यङ्ग्यार्थस्य (प्रतीयमानार्थस्य) स्वतन्त्रां सत्तां स्थापयताऽपि ध्वनिप्रस्थानप्रतिष्ठापकेनानन्दवर्द्धनाचार्येण व्यञ्जनायाः किमपि स्वरूपं न निर्दिष्टम् । तत्पूर्ववर्त्तिभिराचार्यैरपि व्यञ्जना न परिभाषिता । व्यञ्जनायाः प्रबलसमर्थकेन मम्मटेनापि व्यञ्जनायाः किमपि लक्षणं न कृतम् । ध्वनिवादिनामाचार्याणामियं मान्यता यदालंकारिकैर्ध्वनेस्तथा तस्याभिव्यक्तिहेतुभूतयाः शक्तेर्व्यञ्जनायाः प्रेरणा वैयाकरणानां स्फोटसिद्धान्ततः प्राप्तास्ति । आनन्दवर्द्धनेन ध्वनिनिरूपणे तथा मम्मटेनोत्तमकाव्यस्वरूपनिर्धारणे मान्यतया अस्याः समर्थनमपि कृतम् । प्राचीनव्याकरणे भर्तृहरेर्वाक्यपदीये (ब्रह्मकाण्डे) वर्णिते स्फोटस्वरूपे व्यञ्जनाया बीजमन्तर्निहितमस्ति । कौण्डभट्टेनाप्यस्य समर्थनं कृतम् । अस्मिन् प्रसङ्गे तेन काव्यप्रकाशकारस्योल्लेखोऽपि कृतोऽस्ति—"उक्तं हि काव्यप्रकाशे बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्य व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः[१] ।"

वैयाकरणेषु नागेशेन व्यञ्जनायाः समर्थनं कृतं तथा वैयाकरणसिद्धान्तमञ्जूषायां तस्याः स्वरूपमपि निरूपितमस्ति । तद् यथा—'मुख्यार्थसम्बद्धासम्बद्धसाधारणमुख्यार्थबाधग्रहादिप्रयोज्य प्रसिद्धाप्रसिद्धार्थविषयकबोधजनकत्वं व्यञ्जनात्वम् ।' परमलघुमञ्जूषायामपि तेन लिखितम्—"ननु व्यञ्जनाकः पदार्थः[१] । उच्यते । 'मुख्यार्थबाध निरपेक्षबोधजनको मुख्यार्थसम्बन्धासम्बन्ध साधारणः प्रसिद्धाप्रसिद्धार्थ विषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना ।' अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हरिभिरुक्ता । द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वमिति वैयाकरणानामप्येतत्स्वीकार आवश्यकः ।' तात्पर्य मिदं यत् निपातानां द्योतकत्वस्य स्फोटस्य व्यङ्ग्यतायाश्च सिद्धान्तभूतत्वेन तत्र तत्र विल-

---

१. वैयाकरणभूषणसारः, का. ६६ वृत्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षणार्थ-प्रतीत्यन्यथानुपपत्त्या च वैयाकरणा अपि व्यञ्जनां स्वीकुर्वन्त्येवेति नागेशस्याशयः। पुनश्च तेन लक्षणायामेव व्यञ्जनामन्तर्भावयतां तार्किकाणां मतं निराकुर्वता लिखितम्—"यत्तु तार्किकाः—लक्षणयैव गतार्था व्यञ्जनेति न सा स्वीकार्येत्याहुस्तन्न। लक्षणाया मुख्यार्थ बाध पूर्वक लक्ष्यार्थबोधकत्वात्। मुख्यार्थसम्बद्धार्थस्यैव लक्षणाया बोधकत्वात्। व्यञ्जनाया अतथात्वेन तदनन्तर्भावात्[१]। अस्मिन् प्रसङ्गे तेनाभिधातो व्यञ्जनायाः पार्थक्यं स्पष्टीकुर्वता प्रोक्तम्—'एवं च शक्तिरेतज्जन्मगृहीतैवार्थबोधिका, व्यञ्जना तु जन्मान्तरगृहीता।" अर्थात् शक्तिः (अभिधा) अस्य जन्मनः संस्कारस्य सहयोगेनार्थं बोधयति; व्यञ्जनायान्तु जन्मान्तरस्यापि संस्कारस्य सहयोगोऽपेक्षितः।

यद्यपि वैयाकरणानां स्फोट वादत आलंकारिकाणां ध्वनिवादं यावद् विद्वद्भिर्व्यञ्जनाया आवश्यकता प्रदर्शिता, तस्याः समर्थनमपि कृतम्, किन्तु तेषु केनापि व्यञ्जना स्पष्टतो न परिभाषिता। मम्मटेन केवलमिदमेवाभिहितम्—"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते। संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्।[२]" मम्मटस्योक्तिमिमामाधृत्य परवर्तिभिराचार्यैर्व्यञ्जनायाः स्वरूपं निरूपितम्। तद् यथा हेमचन्द्रेण—'तच्छक्त्युपजनितार्थावगमपवित्रितप्रतिभासहायार्थद्योतन शक्तिर्व्यञ्जकत्वम्[३]।' अर्थादभिधाशक्त्या बोधितोऽर्थः प्रतिभायाः साहाय्येन कमपि नवीनमर्थं बोधयति, तस्य नवीनार्थस्य बोधिका शक्तिर्व्यञ्जना। आशाधर भट्टो यथा—'शक्यलक्ष्यातिरिक्तार्थबोधिका वृत्तिर्व्यञ्जना[४]।'

वस्तुतः, व्यञ्जनायाः प्रतिष्ठापने कृतसंरम्भो मम्मटो व्यञ्जनाविरोधिनां मतखण्डन एव कृतावधान आसीत्। अतस्तेन व्यञ्जनायाः

१. परमलघुमञ्जूषा, शक्तिनिरूपणम्।

२. का. प्र., का. १९

३. काव्यानुशासनम्, १।१०

४. त्रिवेणिका, पृ. २४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वरूपनिरूपणे ध्यानं न प्रदत्तम् । व्यञ्जनायाः स्वरूपं तु तस्याः व्यञ्जन-ध्वनन-प्रत्यायन-द्योतनावगमनाद्यर्थैरेव प्रतीतिमेतीति तस्याशयः । आनन्दवर्द्धनेनापीत्थमेवाभिहितम् । व्यञ्जनाविरोधिषु मीमांसको मुकुल भट्टस्तथा नैयायिको महिमभट्ट एव विशेषतो मम्मटस्य ध्यानपथ-मायातौ । काव्यप्रकाशस्य द्वितीयोल्लासे तेन मुकुलभट्टस्य व्यञ्जना-विरोधिसिद्धान्तं खण्डयता व्यञ्जनाया आवश्यकता प्रतिपादिता, तथा पञ्चमोल्लासे तेन महिमभट्टस्य ध्वनि (व्यञ्जना) विरोधिनां समेषां तर्काणां युक्तिपूर्वकं खण्डनं कृत्वा व्यञ्जनायाः पूर्णप्रतिष्ठापना कृता ।

लक्षणाया विवेचने मम्मटस्य मुकुलात् 'गौरनुबन्ध्यः' इत्यादिषु किञ्चित्सामान्यमतभेदादतिरिक्तः कोऽपि विशेषो मतभेदो नासीदतः स मुकुलमनुसरन् लक्षणां विवेचितवान् । किन्तु व्यञ्जनाया विषये मम्मटस्य मुकुलाद् विशेषो मतभेद आसीदतस्तेन मुकुलस्य व्यञ्जनाविरोधि-विचारानालोचयता सर्वप्रथमं लक्षणामूलाया व्यजनायाः प्रतिपादनं कृतम् । मुकुल भट्टो व्यञ्जनां लक्षणातः पृथक् कामपि वृत्तिं न मन्यते । तस्य मतानुसारं व्यङ्ग्यार्थो लक्ष्यार्थ एव समन्वितः । मम्मटो मुकुलस्य मान्यतामिमां निराकर्तुं लक्षणाया विवेचनेनैव सह लक्षणामूलाया व्यञ्ज-नाया विवेचनमारभमाणो भूमिकारूपामिमां कारिकामवातारयत्—'व्यङ्-ग्येन रहिता रूढौ सहिता तु प्रयोजने' इति, प्रत्यपादयच्च 'प्रयोजनं हि व्यञ्जनाव्यापारगम्यमेव ।'

मुकुलभट्टोऽभिधावृत्तिमातृकायां—'रूढेः प्रयोजनाद् वापि व्यव-हारे विलोक्यते' इति कारिकाया वृत्तौ—'अत्र च लक्षणायाः प्रयोजनं तटस्य गङ्गात्वैकार्थ समवेतासंविज्ञातपदपुण्यत्वमनोहरत्वादिप्रतिपादनम्, न हि तत् पुण्यत्वमनोहरत्वादि स्वशब्दैः स्प्रष्टुं शक्यते' इति लिखन् 'लक्ष-णायाः प्रयोजनं पुण्यत्वमनोहरत्वादि, तत् स्वशब्द (गङ्गा) तो न प्रत्येति, तच्च लक्षणयैव प्रतीतिमेतीति वक्तुमिच्छति । अत्र मुकुलभट्टस्ततटस्य प्रतीतिं लक्षणयैव मन्यते, प्रयोजनस्य प्रतीतिमपि स लक्षणयैव स्वीकरोतीति तस्य वदतो व्याधातः । लक्षणा पूर्वं तटरूपं लक्ष्यार्थं बोधमित्वा पुनः प्रयो-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जन रूपं लक्ष्यार्थं बोधयितुमसमर्था। प्रयोजनमपि लक्ष्यार्थं मत्वा लक्षणा न भवति। तदर्थमपरं प्रयोजनमाश्रयितव्यं भविष्यति। प्रयोजनेऽपि प्रयोजनान्तरं साधयितुं यत्नो विधीयते चेदेवमनवस्था दोषः सम्भविष्यति। मुकुलभट्टस्य पूर्वोक्तमाशयं सम्भाव्यैव मम्मटेन प्रोक्तम्—'एवमप्यनवस्था स्याद् या मूलक्षयकारिणी'[1] इति।

अस्यां स्थितौ प्रयोजनविशिष्टस्यैव तटस्योपस्थितिर्लक्षणया स्वीकर्तव्येति सम्भवतो मुकुलभट्टस्याभिप्रायो भवेदिति सम्भावितं 'विशिष्टलक्षणावादम्' अपि खण्डयितुं मम्मटेनेयं कारिका लिखिता—'प्रयोजनेन सहितं लक्षणीयं न युज्यते'[2] इति। अर्थात् प्रयोजनविशिष्टस्य लक्ष्यार्थस्य स्वीकृतिरयुक्ता। यतः ज्ञानस्य विषयः, ज्ञानस्य फलं चेति द्वयं पृथक् पृथग् वस्तु—'ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्[3]।'

मम्मटेनात्र विशिष्ट लक्षणावादस्य खण्डने उपन्यस्तस्यास्य दर्शनशास्त्रीयसिद्धान्तस्याशयः प्रायः सर्वैरेव दार्शनिकैः स्वीक्रियते यत् प्रत्यक्षादिज्ञानस्य विषया घटपटादयः सन्ति, ते च ज्ञानं प्रति कारणं भवन्ति, अतस्तेषां स्थिति र्ज्ञानात् पूर्वं वर्त्तते। किन्तु ज्ञानस्य फलस्य विषये नैयायिकानां मीमांसकानां च मतभेदोऽस्ति। तेषां मेष मतभेदस्तेन 'ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्' इति दर्शनशास्त्रीयं सिद्धान्तमुद्धरता वृत्तौ संक्षेपतो लिखितम्—'प्रत्यक्षादेर्नीलादि विषयः, फलं तु प्रकटता संवित्तिर्वा' इति[4]। अत्र मीमांसकानां नैयायिकानां च मतान्युद्ध-

१. का. प्र., का. १७
२. ,, का. ,,
३. ,, का. १२
४. मम्मटस्यात्रत्या संक्षिप्ता शैली तस्य टीकाकाराणां मतभेदस्य विषयः सञ्जाताऽस्ति। मम्मटेनात्र निर्देशो न कृतो यत् प्रकटता संवित्तिश्च कस्य दर्शनशास्त्रस्य विषयौ स्तः। अधिकांशटीकाकाराणामित्यत्रैकमत्यं यत् प्रकटता ज्ञातता वा मीमांसकानां मतम्, संवित्तिः (अनुव्यवसायः) नैयायिकानां मतमिति। नैयायिकानामेषोऽनुव्यवसायसिद्धान्तः 'तर्कभाषा' ग्रन्थस्य प्रामाण्यवादे स्पष्टतः प्रतिपादितोऽस्ति। मीमांसका अनुव्यवसायस्य स्थाने ज्ञाततायाः अथवा प्रकटतायाः उत्पत्ति मन्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रतो मम्मटस्याभिप्रायोऽयं यत् मीमांसाशास्त्रे न्यायशास्त्रे च विशिष्ट लक्षणावादस्य स्वीकृतिर्नास्ति ।

इत्थं विशिष्टलक्षणावादं निराकृत्य मम्मटेन सिद्धान्तितम्—'विशिष्टे लक्षणानैवं विशेषाः स्युस्तु लक्षिते ।' (अर्थात् लक्षिते) तटादौ ये विशेषाः पावनत्वादयः (सन्ति) ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च (व्यापारान्तरं) व्यञ्जन-ध्वनन-द्योतनादि-शब्द वाच्यमवश्यमेषितम् ।'

व्यञ्जनाविरोधिषु महिमभट्टो विशेषत उल्लेखनीयोस्ति । व्यञ्जनावृत्ति समाश्रितस्य ध्वनेर्ध्वंसनार्थमेव तेन व्यक्तिविवेकस्य रचना कृता । महिमभट्टो मूलतो नैयायिक आसीत् । नैयायिका व्यङ्ग्यार्थं मानसबोधं मन्यमाना व्यञ्जनाया आवश्यकतां निराकुर्वन्ति । शक्तिवादस्य माधवीटीकाकारेणापि लिखितम्—'व्यञ्जनावृत्तेरन्य शाब्दत्वेऽपि अस्याः कार्यतावच्छेदककोटौ गौरवात् । मनसैव तादृशबोध स्वीकारादित्यादि ।'' (माधवीटीका, पृ० २-३) (यद्यपि नैयायिकेन गदाधरभट्टेन शक्तिवादे व्यञ्जनाया उल्लेखो न कृतः, किन्तु तस्य टीकाकारः कृष्ण भट्टः गौणीं व्यञ्जनां च लक्षणायामन्तर्भावयन् व्यञ्जनायाः सत्तामवश्यं स्वीकरोति—'एवं च गौणी व्यञ्जनयोः पृथग् वृत्तित्वमयुक्तत् । तयो र्लक्षणायामन्तर्भावसम्भवात् ।'' (शक्तिवादः, मञ्जूषाटीका, पृ० १) शक्तिवादस्य माधवीटीकाकारस्तु शक्ति विभाजनस्य खण्डनं कुर्वन् व्यञ्जनायाः पृथग् वृत्तित्वमङ्गीकुर्वन्निवाभाति । तद् यथा—'एतद् विभाजनमनुपपन्नम्, व्यञ्जनायाः पृथग्वृत्तित्वात् ।')

नैयायिकानां नये श्लेषद्वाराऽन्यार्थस्य प्रतीतिरपि अभिधयैव सम्भवति । अतो व्यङ्ग्यार्थस्य प्रतीतयेऽभिधामूला व्यञ्जनानावश्यकी । महिमभट्टोऽपि नैयायिकीं पद्धतिमनुसरन् केवलामभिधामेव शक्ति मन्यते—'शब्दस्यैकाऽभिधा शक्तिः[1] ।' अभिधा केवलं संकेतितमर्थं बोधयति । लक्ष्यो व्यङ्ग्यश्च शब्दस्यानुमेयार्थौ स्तः । महिमभट्टस्य मतानुसारं

१. का. प्र., का· १८, वृत्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दस्य समस्तो व्यवहारः साध्यसाधन (कार्यकारण) भावयुक्तः । अतोऽसौ प्रायोऽनुमानरूप एव । शब्दः साधनम्, अर्थस्तस्य साध्यः । महिमभट्टस्य व्यञ्जनाविरोधिविचाराणां सारांशोऽयं यद् व्यञ्जनाऽनुमानतः सर्वथाऽभिन्ना । व्यञ्जनाया यत् परिष्कृतं लक्षणं तदनुमानरूपमेव । व्यङ्ग्यार्थस्य प्रतीतौ पूर्वापरभावोऽपेक्षितः । ज्ञाप्यज्ञापकभावेन व्यङ्ग्यार्थस्य प्रतीतेः स्वीकरणं तु प्रकारान्तरेणानुमानस्यैव स्वीकृतिः । यतो ज्ञाप्यज्ञापक प्रक्रिया अनुमानप्रक्रियातोऽभिन्ना । अतोऽनुमानमेव व्यञ्जना ।

महिमभट्टस्य मते "मुख्यवृत्त्या द्विविध एवार्थो वाच्यो गम्यश्च (वाच्योऽनुमेयश्च) । उपचारतस्तु व्यङ्ग्य स्तृतीयोऽपि संभवति, परन्तु तृतीयस्यास्तु यल्लक्षणं तदनुमानस्यैव संगच्छते, न व्यक्तेः । यदुक्तम्—'त्रिरूपाल्लिङ्गाद् यदनुमेये ज्ञानं तदनुमानम्' इति । तच्चानुमानमेव । न ह्यर्थादर्थान्तरप्रतीतिरनुमानमन्तरेणार्थान्तरमुत्पद्यते । न च वाच्यादर्थादर्थान्तरप्रतीतिरविनाभावसम्बन्धस्मरणान्तरेणैव सम्भवति, सर्वस्यापि तत्प्रसङ्गात्[1] ।'

आत्मनोऽनेनैव तार्किकसिद्धान्तेन महिमभट्टो ध्वनिवादिनां मूर्द्धाभिषिक्ते उदाहरणे 'भ्रम धार्मिक विश्रब्धः' इत्यादौ प्रथमं प्रहारं कृतवान्, तथा तत्र भ्रमणनिषेधरूपो व्यङ्ग्यार्थोऽनुमेय एवेति, पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वेति त्रिरूपलिङ्गस्य (हेतोः) साहाय्येनानुमानेन संसाध्य व्यञ्जनाऽनुमानादनतिरिक्तेति स्थिरीकृतवान् ।

महिमभट्टो येन हेतुना भ्रमणनिषेधरूपसाध्यस्य सिद्धिमनुमानेनकृतवान्, मम्मटस्तमेव हेतुं हेत्वाभासत्वेन सिद्धीकुर्वन् प्राह—'तत् कथमेवं विधाद्धेतोः साध्यसिद्धिः[2] ।' व्यक्तिवादिनां मते व्याप्तिज्ञानं विनापि एवं भूतः सहृदयहृदयवेद्यो व्यङ्ग्यार्थः प्रकाशितो भवति । तेषां मते उपर्युक्त दोषाणां सम्भावनैवेति तदाशयः ।

तात्पर्यमिदं यद् व्यङ्ग्यार्थस्य प्रतीतिरनुमानप्रक्रियया न कदापि सम्भवति । आनन्दवर्द्धनेनापि लिखितम्—"वाचकत्वे हि तार्किकाणां

१. व्यक्तिविवेकः, चौ. सं. १।२६
२. ,, पृ. ८१-८३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विप्रतिपत्तयः प्रवर्त्तन्ताम्—किमिदं स्वाभाविकं शब्दानामहोस्वित् सामयिकमित्यादि। व्यञ्जकत्वे तु तत्पृष्ठभाविनि भावान्तरसाधारणे लोकप्रसिद्ध एवानुगम्यमाने को विमतीनामवसरः। न पुनरयं परमार्थो यद्व्यञ्जकत्वं लिङ्गत्वमेव सर्वत्र, व्यङ्ग्यप्रतीतिश्च लिङ्गप्रतीतिरेवेति। यदि हि लिङ्गितया तत्र शब्दानां व्यापारः स्यात् तच्छब्दार्थे मिथ्यात्वादिवादा एव न प्रवर्त्तेरन्, धूमादिलिङ्गानुमितानुमेयान्तरवत्। काव्यविषपे च व्यङ्ग्यप्रतीतीनां सत्यासत्यनिरूपणस्याप्रयोजनत्वमेवेति तत्र प्रमाणान्तरव्यापारपरीक्षोपहासायैव सम्पद्यते। तस्माल्लिङ्गिप्रतीतिरेव सर्वत्र व्यङ्ग्यप्रतीर्न शक्यते वक्तुम्॥"

न्यायशास्त्रीयसिद्धान्तानुसारं सन्देहे सत्येवानुमानप्रवृत्तिः--'नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते, किन्तर्हि संशयितेऽर्थे।' अतः शुद्धहेतुसहकृतानुमानेन याऽर्थसिद्धिः सा प्रायोयथार्थैव, तत्र सन्देहस्य मिथ्यात्वस्य च सम्भावना न। इत्थमेव, यदि शब्दादुत्पन्नो व्यङ्ग्यार्थोऽनुमितिस्वरूपश्चेत् तस्यार्थस्य विषयेऽपि मिथ्यात्वादिविषया विवादा न सम्भविष्यन्ति। किन्तु व्यङ्यार्थो तथा न, अतो व्यङ्ग्यार्थोऽनुमेयार्थोनेति ध्वनिकाराशयः।

मम्मटेन ध्वनिकारमनुसरता महिमभट्टस्यानुमानवादः खण्डितः। यद्यप्यस्यां खण्डनप्रक्रियायां मम्मटेन कुत्रापि महिममट्टस्य नाम निर्देशो न कृतः, तथापि तस्य विचारैः सह मम्मटस्य विचाराणां तुलनात्मकविवेचनेनेदं स्पष्टतां व्रजति यदनुमानवादस्य खण्डने महिमभट्टो मम्मटभट्टस्य सम्मुखं तिष्ठति।

विश्वनाथेनापि मम्मटस्य विचाराः समर्थिताः—'नानुमानंरसादीनां व्यङ्ग्यानां बोधनक्षमम्। आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः[१]॥" राजानकरूय्यकेनापि प्रोक्तम्-'यत्तु विवेककारो वाच्यस्य प्रतीयमानं प्रति लिङ्गतया व्यञ्जनस्यानुमानान्तर्भावमाख्यत् तद् वाच्यस्य प्रतीयमानेन सह तादात्म्यतदुत्पत्त्यभावादविचारिताभिधानम्[२]।"

१. का. प्र., पञ्चमोल्लासः, अन्तिमावृत्तिः।
२, ध्वन्यालोकः, ३।३३ वृत्तिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निष्कर्षतः, व्यञ्जनाविरोधिनीनां सर्वासां मान्यतानां खण्डनंकृत्वा व्यञ्जनायाः पूर्णप्रतिष्ठापने मम्मटस्य प्रयासः श्लाघनीयोऽस्ति। अस्मिन् प्रयासेऽसौ सर्वप्रथममभिहितान्वयवादिनाम् अन्विताभिधानवादिनाम्, दीर्घदीर्घतराभिधाव्यापारवादिनां मीमांसकानां व्यञ्जनाविरोधिमतं निराकुर्वन् तेषां कृतेऽपि व्यञ्जनाया आवश्यकतां प्रतिपादितवान्। तदनन्तरं तेनाभिधावादिनां मुकुलभट्टादीनाम्, तात्पर्यवादिनां धनञ्जयधनिकादीनाम्, (रामोऽस्मि सर्वं सहे') इत्यादौ) लक्षणावादिनां साहित्यकाराणां व्यञ्जनाविरोधिविचारान् कटुशब्दैरनालोचयता व्यञ्जना अभिधा-तात्पर्य-लक्षणाभ्यः पृथक् तुरीया वृत्तिरिति स्थिरीकृतम्। ततस्तेन वेदान्तिनां तथा वैयाकरणानामखण्डार्थतावादो व्यञ्जनाया आवश्यकतापूर्त्तावक्षम इति स्पष्टीकृतम्। अन्ते च तेन व्यञ्जनायां सर्वाधिकप्रसारकर्तुर्महिमभट्टस्यानुमानप्रक्रियां नैयायिकानां पद्धत्यैवनिराकृत्य व्यञ्जनामनुमानेऽन्तर्भावयितुं कटिबद्धानां नैयायिकानामुत्साहो ध्वंसितः। खण्डनमण्डनयोरस्मिन्प्रयासे मम्मटेन यस्य शास्त्रविशेषस्य व्यञ्जनाविरोधि मतं खण्डितं व्यञ्जनाया मण्डनेऽपि तेन तस्यैव शास्त्रस्य सिद्धान्त आधारत्वेन गृहीतः, तथा स्वकीयैः, प्रबलतर्कैरिदं सम्यक् प्रमाणीकृतं यद्व्यञ्जनाविरोधिनः स्वशास्त्रसिद्धान्तानां समर्थनेऽसमर्थास्तथा तेषामनभिज्ञाः सन्तीति।

वस्तुतो व्यञ्जनायाः स्थापनायां मम्मटस्यैष प्रयासः सर्वथा स्तुत्यः, तथा व्यञ्जनावृत्तेः सुस्थिरस्थापना साहित्यशास्त्राय तस्य महत्वपूर्णमवदानमस्ति। काव्यप्रकाशस्य टीकाकारैर्मम्मटस्यास्यावदानस्य श्लाघा कृताऽस्ति।

"सम्यगत्र प्रमेयस्य हृदयोद्घाटनं कृतम्।
प्रेक्षावन्तः परीक्षन्तां प्रीत्या वा स्पर्द्धयाऽथवा॥"

(श्रीविद्याचक्रवर्ती—सम्प्रदाय प्रकाशिनो)

"एवञ्चावागगोचरब्रह्मबोधिकेयमलौकिकी वृत्तिर्वाग्देवताऽङ्गीकृता व्यञ्जना ब्रह्मणाप्यपलपितुमशक्येति सुधीभिर्मन्तव्यम्।"

(भीमसेनः—सुधासागरटीका)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयमधिवेशनम् (कलकत्ता)

श्लोकाः	श्लोकसंख्या
४७ सन्नाहः	६७३-६८२
४८ सुरेन्द्रनाथ बानर्जी	६८३-६९०
४९ सभ्यानां सङ्ख्या	६९१-९५
५० मदनमोहनमालवीयः	६९६-७००
५१ नौरोजी महाशयस्य भाषणम्-	७०१-७१३
५२ प्रस्तावाः रामपालसिंहस्य भाषणम्-	७१४-७२३
५३ मालवीयस्य भाषणम्	७२४-७३७
५४ प्रस्तावाः पारिताः	७३८-७४३
५५ विरोधिनां प्रतिक्रिया	७४४-७६२
५६ डफ्रिन महोदयस्य प्रतिक्रिया	७६३-७६९
५७ ह्यूम महाभागेन कृतं उद्‌बोधनम्-	७७०-८००

तृतीयमधिवेशनम् (मदरास्)

५८ सन्नाहः-	८०१-८१७
५९ भूपालकृतं समर्थनम्	८१८-८२४
६० आङ्ग्लैः अन्यैश्चकृतं समर्थनम्	८२५-८३४
६१ मण्डपनिर्माणम्-	८३५-८३६
६२ प्रतिनिधीनां आगमनम्-	८३७-८४१
६३ मदरास् नगरस्य वैशिष्ट्यं	८४२-८४८
६४ सभा समारम्भः सर्वजातीयानां प्रतिनिधित्वम्	८४९-८५९
६५ सभायाः वैलक्षण्यम्	८६०-८६९
६६ स्वागतभाषणम्	८७०-८७८
६७ तयाबजी भाषणम्	८७९-९००
६८ प्रस्तावाः	९०१-९०२
६९ ईर्ड्ले नार्टन् महाशयस्य भाषणम्	९०३-९१७
७० मालवीयस्य भाषणम्	९१८-९२३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७१ एः के-दत्तस्य भाषणम्	६२४-६२५
७२ राज्ञो रामपालसिंहस्य भाषणम्	६२६-६३३
७३ के. टि. शङ्करन् नायर-	६३३-६३५
७४ वि. हेच्-चेस्टर-	६३६-६३७
७५ तञ्जावूर् मूकणाचारी (तक्षा)	६३८-६४०
७८ सभापतिमुदलियार्	६४१-६४५
७९ विपिनचन्द्रपालः	६४६-६५४
८० निगमनम्-	६५५-६५६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारतराष्ट्रीय कांग्रसीयेतिहासः
राष्ट्रीयान्दोलनकथा
1857 - 1885

के० कस्तूरिरंगाचार्यः
"श्रीरंगमुनिः"

अथचानन्तरे वर्षे द्वितीयमधिवेशनम् ।
आयोजितं कांग्रसीयैः कलकत्तानगरोत्तमे ॥ ६७३ ॥

जित्वा तु पश्चिमामाशां मुम्बय्यामधिवेशने ।
जिगीषन्तीव पूर्वामप्याशां तत्रागमत् सभा ॥ ६७४ ॥

तत्राधिवेशने दादाभाईनौरोजिनामकः ।
कांग्रस् सभास्थापकेषु पूजनीयतमो महान् ॥ ६७५ ॥
पारसीकमतालंबी भारतीयपितामहः ।
अन्वर्थनामाऽध्यक्षोऽभूत् सर्वसभ्यसमादृतः ॥ ६७६ ॥

मासत्रयात् पूर्वमेव सज्जीकरण कर्मणि ।
संप्रवृत्ताः समायोज्य सत्कारसमितिं तदा ॥ ६७७ ॥

जोतीन्द्रमोहनः ठाकुर् 'सर' पदेन विभूषितः ।
महाराजस्तदाध्यक्ष्यं नियमेन वहन्नपि ॥ ६७८ ॥

केनाऽपि कारणेनात्र सभायां अनुपस्थितः ।
अतो राजेंद्रलाल मित्रः चक्रे स्वागतभाषणम् ॥ ६७९ ॥

दर्भंगापुरराजाद्या, क्षेत्रीया भूमिपालकाः ।
साहाय्यमार्थिकं चक्रुः सभ्यतां च प्रपेदिरे ॥ ६८० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इन्दियन् यूनियन्नाद्याः पूर्वमेव प्रतिष्ठिताः ।
संस्थाः संप्रेषयामासुः स्वान् स्वान् प्रतिनिधीन् क्रमात् ॥ ६८१ ॥

सुरेन्द्रनाथ बनर्जी—

वंगदेशे पुनः तस्याः सर्वत्र प्रबलत्वतः ।
सुरेन्द्रनाथो बानर्जी तन्नेताऽति प्रभाववान् ॥ ६८२ ॥

सर्वातिशायी शुशुभे स्वगणैर्बहुभिर्वृतः ॥
कांग्रस् सभा स्थापनातः पूर्वमेवातुलं यशः ॥ ६८३ ॥

प्राप्तवान् यः स्वयं कांचित् कलाशालां च निर्ममे ।
सर्वकारस्य सेवातः निवृत्तः स्वेच्छया ततः ॥ ६८४ ॥

"बंगाली" नामपत्रात् यदकरोत् जन जागृतिम् ।
यद् 'इन्दियन् असोसेषन्' द्वारा राष्ट्रस्य सेवनम् ॥ ६८५ ॥

(पच्छद्वयोः अत इति उत्तरेणान्वयः) =

सालग्रामशिलायाश्च वैभवं धार्मिकं वदन्[१] ।
न्यायालये दण्डितोऽतः प्राप्तवानतुलं यशः ॥ ६८६ ॥

आंग्लराज्येऽतिविश्वस्तः भारतीयः प्रकीर्तितः ।
तथाऽपि दण्डाभिहतः कदाचित् "बारिसाल" पुरे ॥ ६८७ ॥

पश्चाद् द्विवारं यश्चास्याः अध्यक्षोऽपि भविष्यति ।
भविष्यति च वंगानां कदाचित् मंत्रिसत्तमः ॥ ६८८ ॥

"यस्य भाषा च शैली च प्रतिपादनपद्धतिः ।
श्रोतॄणां हृदये लग्ना प्रभावोत्पादिका भवेत् ॥" ६८९ ॥

---

१. ९६ पृष्ठे The Nationalist Movement in India – Mahajan.
सुरेन्द्रनाथ बानर्जी
सालग्रामशिलायाः पवित्रतां स्थापयितुं प्रवृत्त; कलकत्ता न्यायलये दण्डितः, कारावास: ८८३ (May 5 to July 14).

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्येवं सच्चिदानन्दसिंहाद्यै राष्ट्रनेतृभिः ।
अन्यैश्च वहुभिदेशसेवकैः सुप्रशंसितः ॥ ६६० ॥

द्वितीयमधिवेशनम्—

सभ्यानां संख्या...

यां प्रतीक्षितवान् संख्यां सभ्यानां ह्य ूम महाशयः ।
ततोऽभ्यधिकया सभ्याः सभायां समुपस्थिताः ॥ ६६१ ॥

चत्वारिंशद्युता संख्या सदस्यानां चतुश्शती ।
प्रेक्षकाणां च संख्या सा न ममौ भवने तदा ॥ ६६२ ॥

उपसप्तति संख्या या पूर्वस्मिन्नधिवेशने ।
चतुश्शताधिका जाता समनन्तरहायने ॥ ६६३ ॥

चतुश्चत्वारिंशता तु संख्यया तत्र संगताः ।
मुसलीमानां प्रतिभुवः समलंचक्रिरे सभाम् ॥ ६६४ ॥

संख्यया प्रतिभूत्वेनाप्यसौ हि वलवत्तरा ।
एतेन लोकप्रियता सभायाः प्रकटीकृता ॥ ६६५ ॥

मदन मोहन मालवीयः—

मदनो मोहनो मालवीयस्तत्र महामनाः ।
सभां प्रभावयामास भ्राजसा भाषणेन च ॥ ६६६ ॥

महामहोपाध्यायेति विरुदेन विभूषितः ।
संस्कृते चांग्लभाषायां समर्थः पंडितोत्तमः ॥ ६६७ ॥

वैदिकाचारसंपन्नः प्राच्यधर्मविभावकः ।
विश्वविद्यालयं यस्तु काश्यां संस्थापयिष्यति ॥ ६६८ ॥

यो भगीरथवत् गंगां परं पारं महोदधेः ।
पानीयव्याजतो नीत्वा पाययेदांग्ल भूतलम् ॥ ६६९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कांग्रस सभाया अध्यक्षो भविष्यति महायज्ञाः ।
योऽन्तिमश्वासपर्यन्तं देशसेवां करिष्यति ।। ७०० ।।

श्रीदादाभाई नौरोजीमहाशयस्य भाषणम्—

राजेंद्रलालमित्रस्य स्वागतोक्तेरनन्तरम् ।
नौरोजी भाषणं चक्रे राज्ञ्यै स्वस्ति प्रवाचयन् ।। ७०१ ।।

"इदं सौभाग्यमस्माकं यद् ब्रित्तन्शासने स्थिताः ।
[1]यच्चात्र संगताः सर्वे वयमत्र परस्परन् ।। ७०२ ।।

प्रकाशयामः स्वं भावं संकोचं वा भयं विना ।
संमेलने भाषणे च स्वाभिप्रायप्रकाशने ।। ७०३ ।।

एतादृशं यत् स्वातन्त्र्यं अस्माकं भाषणादिषु ।
ब्रित्तन् शासने, एवैतत् लभ्यते नान्यशासने ।। ७०४ ।।
(करतालिकाः)

[2]"पृच्छामिवोऽधुना प्रश्नं" इयं कांग्रस महासभा ।
शासकानां विरुद्धा किं ? ('न न न' इति ध्वनिः ।। ७०५ ।।
किं वा तेषां समर्थिका ?
(आम् आम्' इति ध्वनिः)

एकमेव भवेदस्य प्रश्नस्योत्तरम् 'ओम्' इति ।
क्षेमं कराणि कार्याणि तेषां विद्मो यतो वयम् ।। ७०६ ।।

विक्टोरिया महाराज्ञ्या औदार्यस्य निदर्शनम् ।
अस्याः सभायाः अस्माकं इदमेवाधिवेशनम् ।। ७०७ ।।

एवमा भाष्य नौरोजी वैधानिक परिष्कृतेः ।
विषयेऽपि मतं स्वीयं जगाद जनसंसदि ।। ७०८ ।।

---

१. Page 131 The Nationalist movement in India by V.D.
२- Page 139 The evolution of India and Pakisthan 1859-1947 by C. H. Philips

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विधानपरिषदि सभ्यनियुक्तिविषये—

नौरोजी महाशयस्य भाषणम्—

[1]विधानपरिषत् सभ्याः सर्वकार नियोजिताः ।
प्रजाप्रतिनिधित्वं तु वोढुं नार्हन्ति सर्वथा ।। ७०९ ।।

जनैर्वृता एव सभ्याः जनानां हितचिन्तकाः ।
अन्ये सभ्यास्तु न विदुः कदाऽपि जनसम्मतिम् ।। ७१० ।।

लोकाचार विचारादीन् अविज्ञाय विधीन् मुधा ।
नियुक्तसभ्याः कुर्वन्ति निन्दापात्रं भवन्ति च ।। ७११ ।।

सर्वकारस्य निन्दायाः संघर्षस्य च हेतवः ।
जनैर्वृताः सदस्याश्चेत् विधीन् कुर्युः जनाहितान् ।। ७१२ ।।

त एव निन्दनीयाः स्युः न तु शासनकारिणः ।
एवं च निन्दा पात्रत्वं आंग्लानां नैव संभवेत् ।। ७१३ ।।

प्रस्तावाः—

पूर्वस्मिन् पारिताः केचित् प्रस्तावाः अधिवेशने ।
अस्मिन्नपि पुनः प्रोक्ताः पारिताः सावधारणम् ।। ७१४ ।।

राजा राम् पालसिंहस्तु प्रस्तावं न्यदधात् नवम् ।
'सेनायां भारतीयानां स्वयंसेवकताऽपि वा ।। ७१५ ।।

संमान्या सर्वकारेण'' त्येवें प्रस्तूय भाषणम् ।
प्रभावोत्पादकं चक्रे चेतयामास शासनम् ।। ७१६ ।।

राज्ञः रामपालसिंहस्य भाषणम्—

''आंग्लास्तु मुष्टिप्रमिताः तद्देशश्चाल्पविस्तृतः[2] ।
महान्तो बलवन्तश्च देशाः तत्परितः स्थिताः ।। ७१७ ।।

---

१. पृष्ठे१११तमे—भारतीय संविधान का विकास तथा राष्ट्रीयान्दोलन—by अग्रवाल

२. Pax Britannica.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्तु वा स्थापिता शान्तिः आंग्लराज्येषु सर्वतः[1] ।
अस्तु वैते भारतानां अत्यन्तहितचिन्तकाः ॥ ७१८ ॥

तथाऽपि हृदयेऽस्माकं तोलने मोदखेदयोः ।
खेद एवांग्ल विषयेऽभ्यधिको नाऽत्रसंशयः ॥ ७१९ ॥

राष्ट्रीयशक्तिरस्माकं सर्वथा नाशितांगलैः ।
यतस्सा स्फुटिता शक्तिः यस्यां वृद्धिमुपागता ॥ ७२० ॥

तद्भूमेः रक्षणे साऽद्य प्रभ्वी न परिदृश्यते ।
अस्माकं परितः सर्वे देशाः सेनाबलान्विताः ॥ ७२१ ॥

विपत्तिः सर्वदेशानां आपतिष्यति माचिरम् ।
अवश्यमांग्ल द्वीपोऽपि यद्विपत्तौ पतिष्यति ॥ ७२२ ॥

अत्यन्तमृद्धिमन्तोऽपि शत्रुभिः परिपीडिताः ।
अवरुन्ध्युः कथं शत्रून् शतेनैव सहस्रकान् ॥ ? ॥ ७२३ ॥

मालवीयस्य भाषणम्—

ततः सभापतेः पार्श्वादुत्प्लुत्यैवागतः क्षणात् ।
स्थितः कस्यांचिदासन्द्यां मालवीयो महामनाः ॥ ७२४ ॥

सर्वेषां प्रेक्षकाणां च दृष्टिं चित्तमपाहरन् ।
सभां प्रभावयामास प्रस्तावं तं समर्थयन् ॥ ७२५ ॥

"स्वशासनविधेर्मातित्यांग्लानां संसदुच्यते ।
आंग्लजीवनसारांशः स्वशासनमितीर्यते ॥ ७२६ ॥

---

१. राजा राम पालसिंहस्य भाषणं—Page-180. The History of the Congress by-Pattabhi Seetharamayya.

२. मालवीयव्याख्यानसारांश । द्रष्टव्यः Page 108-109. The Encyclopedia of I. N. Congress. Volume I by Moin zaidi & Sheheda zaidi.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा सति किमर्थं तदन्येभ्यो न प्रदीयते ।
कथमांग्लो भवेद्यस्तच्छासनं प्रतिषेधति ।। ७२७ ।।

निर्वाचितैरेव सभ्यैः निर्वाहः कार्य इत्यपि ।
कथमांग्लो न जानाति किमर्थं तस्य याचना ? ।। ७२८ ।।

स्वैरिणः शासकस्यैव कस्यापि त्रासवादिनः ।
शासने निवसामश्चेत् कर्तव्या याचना भवेत् ।। ७२९ ।।

किमिदं शासनं स्वस्य प्रजानां यद् हितावहम् ।
तत् कर्तव्यं न जानाति ! यतो याचामहे वयम् ।। ७३० ।।

"नास्ति प्रतिनिधित्वं चेत् नाधिकारः करग्रहे"[1] ।
इतिसूत्रविधातारः कथं ते वञ्चयन्ति नः ? ।। ७३१ ।।

न मूका न वराकावा वयं भारतवासिनः ।
शुल्कमाक्रष्टुमिच्छन्ति यदस्मत् सम्मतिं विना ।। ७३२ ।।

भारते प्रचलत्यत्र स्वैरिणां यत्तु शासनम् ।
यच्च शासकवर्गोऽऽस्मान् स्वदासानेव मन्यते ।। ७३३ ।।

श्रुत्वा तदांग्लद्वीपस्था भवेयुर्लज्जिता जनाः ।
ब्रित्तन् प्रजानां सर्वासां अधिकारः स्वशासने ।। ७३४ ।।

वर्तते चेद् भारते तद् किमर्थं प्रतिषिध्यते ? ।
स्वस्मै स्वतंत्रतां वांछन् गुणी किं वञ्चयेत् परान् ? ।। ७३५ ।।

इत्येवं भाषणं तस्य श्रुत्वा सर्वे सभासदः ।
तेनैवोन्नीतहृदयाः सर्वमन्यद् विसस्मरुः ।। ७३६ ।।

---

१. "No taxation without [representation"—Burk's Parliamentary speech.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रस्तावाः पारिताः—

एवं कतिपयैः सभ्यैः स्वाभिप्राये निवेदिते।
प्रस्तावाः सर्वसम्मत्याऽधस्तनाः पारिमास्तदा ॥ ७३७ ॥

"विधान परिषद्सभ्यैर्भाव्यं जनमतैर्वृतैः।
केन्द्रे प्रान्ते च, निर्वाहे सम्बन्धरहितैस्तथा ॥" ७३८ ॥

"प्रामाणिका विशेषज्ञाः सर्वत्र न्यायमन्दिरे।
न्यायाधीशसहायार्थं नियोज्या दण्डनिर्णये ॥" ७३९ ॥

"सेनायां भारतीयानां स्वयं सेवककर्मणि।
नियुक्तिरनुमन्तव्या सर्वकारेण सर्वथा ॥" ७४० ॥

सभाविसर्जनात् पश्चात् राजप्रतिनिधिः स्वयं।
सभाप्रतिनिधीन् सर्वान् भवनं स्वं न्यमन्त्रयत् ॥ ७४१ ॥

सुरेन्द्रनाथ बानर्जी विना सर्वे समागताः।
प्रभुणा तेन सौहार्दपूर्वं संल्लप्य सत्कृताः ॥ ७४२ ॥

वर्षत्रयात् पूर्वमासीद् व्यर्थमिलवर्ट् विधेयकम्।
सुरेन्द्रनाथो बानर्जी यश्चान्याय्येन दण्डितः ॥ ७४३ ॥

एताभ्यां घटनाभ्यान्तु तीव्रमुत्तेजिता जनाः।
स्वीयां प्रतिक्रियामैच्छन् प्रदर्शयितुमैक्यतः ॥ ७४४ ॥

यत्नात् सुरेन्द्रनाथस्य कलकत्तानगरे तदा।
नेषनल कान्फरन्स् नाम्ना सम्मेलनमकारयन् ॥ ७४५ ॥

शतादधिक संख्याका मुस्लीमा हिन्दवस्तथा।
जनानां प्रमुखास्तस्मिन् आङ्ग्लौ द्वौ च समागताः ॥ ७४६ ॥

---

१. juries.

१. प्रथमसम्मेलन (National Conference) १८८३ ई वर्षे प्राचलत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"राजनैतिकसंस्थानां इदम्प्रथमसम्भवम् ।
सम्मेलनम्" इति प्रोचुः राजनीतिविदो जनाः ॥ ७४७ ॥

सम्मेलनस्याध्यक्षोऽसौ आनन्दो मोहनो वसुः ।
अवदत् "सम्सदो बीजं भविष्यन्त्याः भवेदि"ति ॥ ७४८ ॥

अस्य सम्मेलनस्यैव द्वितीयमधिवेशनम् ।
पुनर्वर्षद्वयात् पश्चात् कलकत्तानगरेऽभवत् ॥ ७४९ ॥

इदमायोजितं तत्र समाजैस्त्रिभिरैक्यतः ।
भारतीय समाजेन ब्रित्तन् भारतसङ्घिभिः ॥ ७५० ॥

मध्यकेन्द्रमुसलमानसङ्घनाम्नाऽपि केनचित् ।
महम्मदीयसङ्घोऽयं नव्योऽद्य स्थापितोऽभवत् ॥ ७५१ ॥

अमीर् अलिस्तस्य मन्त्री सम्मेलनमुपागमत् ।
इदं प्रतिनिधीभूतं सर्वेषां भारतौकसाम् ॥ ७५२ ॥

मुस्लीमानामपीत्येवं स्वीचक्रेऽसौ अमीर अलिः ।
चत्वारिंशत् प्रसिद्धास्तु मुस्लीमा यत्र सङ्गताः ॥ ७५३ ॥

काङ्ग्रसीयसमावेशे द्वितीये, तद्दशांशतः ।
तस्य प्रतिनिधित्वं तु निषेधन् व्यलिखत् तदा ॥ ७५४ ॥

---

१. अस्य द्वितीयं अधिवेशनम् सन् १८५५ दिसम्बर मासे अस्मिन् सम्मेलने Central Mohamadan Association अस्याः नवीनतया स्थापितायाः संस्थायाः मंत्रित्वेन अमीर अलिः समागतः, अस्य सम्मेलनस्य भारत जन प्रतिनिधित्वं अङ्गीकरोति ।

This all India Conference was organised jointly by
The Indian Association (Surendranath Banerji)
The British Indian Asso (landed interest)
Central Mohamuden Asso (Amir Ali Secretary) extracts from page-7 of the 77th plenary session of I. N. C. 1983 Souvenir.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"अयं हिन्दूसमावेशो न्यक्कृतोऽस्मज्जनैरि"ति ।
अन्योऽप्यब्दुललत्तीफ़नामा तद्वाणीमन्वभाषत ॥ ७५५ ॥

विरोधिनां प्रतिक्रिया—आङ्ग्लपत्रिकाः—

आङ्ग्लैः सञ्चालिताः काश्चित् पत्रिकाः व्यलिखन्निदम् ।
"इदन्तु वङ्गबाबूनां केषाञ्चिदधिवेशनम् ॥ ७५६ ॥

उपेक्षितं मुसलमानैः" इति मिथ्या विलिख्य च ।
आन्दोलनस्य मुख्यत्वं अपन्होतुं समुद्यताः ॥ ७५७ ॥

आद्याधिवेशने द्वावेवास्तां मुस्लीम् जनौ तदा ।
चत्वारिंशदिदानीं सा संख्या वृद्धिमुपागता ॥ ७५८ ॥

इयं समस्तसङ्ख्यायां दशांशत्वेन विस्तृता ।
तथाऽपि केचिदाङ्ग्लानां प्रेरणाद् मुस्लिमा जनाः ॥ ७५९ ॥

कांग्रसीयान्दोलनस्य विरोधं कर्तुमुद्यताः ।
"आक्लन्द् कोल्विन्" महाभागः तेषां नेतृत्वमावहत् ॥ ७६० ॥

डफ्रिन महोदयस्य प्रतिक्रिया—

अवधादि प्रदेशानामासीद् यो राज्यपालकः ।
तादृशानां वचस्तथ्यं मत्वा डफ्रिन् महाशयः ॥ ७६१ ॥

कुर्वन् प्रतिध्वनिमिव सभायां क्वचिदब्रवीत् ।
"क्वचिदुत्पतनेच्छूनां अज्ञाने स्वप्रशासने ॥ ७६२ ॥

अणुमात्राल्पसङ्ख्यानां विद्यात् कांग्रससभामि"ति ।
तेनास्मिन् विषये तस्य विभ्रमोऽभूदिति स्फुटम् ॥ ७६३ ॥

प्रत्यक्षं विजितं श्रुत्या (दुर्बोधनस्य)—

यत्सम्मत्या समारब्धा सभा, यस्तत्समर्थकः ।
योऽसौ सभासदः सर्वान् समामन्त्र्य स्वके गृहे ॥ ७६४ ॥

---

१. प्रमाणाकरः—पेज-३८, ३९ A Hundred years of the "Hindi"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्यक् सम्मानयामास सौहार्दं स्वं प्रकाशयन्।
स एवाद्य यदि द्वेष्टि तानेवेमान् सभासदः ॥ ७६५ ॥

"अणुमात्राल्पसङ्ख्याकान्" मन्यते चेत् ध्रुवं, ततः।
प्रत्यक्षं बाधितं श्रुत्या शङ्कार्तानां मृषागिराम्!॥ ७६६ ॥

एवं मिथ्या प्रचारेण प्रभावितमनास्तदा।
निवृत्तिमाप्स्यन् स्वपदात् गमिष्यंश्च स्वकं गृहम् ॥ ७६७ ॥

डफ्रिन् महोदयो राष्ट्रीयान्दोलनं इदंमहत्।
कलङ्कयितुमिच्छन् स्वां कीर्तिमेवाकलङ्कयत् ॥ ७६८ ॥

ह्यूम् महाभागेन कृतं उद्बोधनम्—

ततश्च ह्यूम् महाभागः भारतीयान् प्रशिक्षितान्।
निश्चिन्तान् सुखसंसक्तान् उद्बोधयितुमिच्छुकः ॥ ७६९ ॥

कञ्चित् प्रकाशयामास लेखं विवरणात्मकम्।
दुर्दशा भारतीयानां स्पष्टं यस्मिन् प्रदर्शिता ॥ ७७० ॥

एकतो भारतानां यदज्ञानं या च दुर्दशा।
अन्यतश्शासकांग्लानां कापट्यं या कठोरता ॥ ७७१ ॥

दृष्ट्वोभयं दयार्द्रः सन् भारतीय प्रबोधनम्।
चक्रे स्वलेखनद्वारा सो द्वेगं ह्यूम महाशयः ॥ ७७२ ॥

"हे पुत्रा भारतीमातुः उपविष्टाः कुतोऽलसाः ?।
अज्ञातदैव साहाय्यं प्रतीक्षध्वे वृथा किमु ?॥ ७७३ ॥

उत्तिष्ठत प्रयतत स्वीयानां रक्षणे स्वयम्।
जिर्मीयन्ते हि राष्ट्राणि स्वप्रयत्नान्नचान्यतः ॥ ७७४ ॥

स्वतन्त्राः! क्रीतदासाः किं? छायालीनाः प्रसर्पथ ?।
समस्यानां समाधानं युष्माकं हि वशे स्थितम् ॥ ७७५
स्वराष्ट्रस्य हि निर्माणं स्वत एव नचान्यथा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

युष्मत्तो गृह्यते शुल्कं युष्मदिच्छा विरोधतः।
उत्थाय तद्विरोधार्थं वाद्यतां पटहध्वनिः॥
स्वप्रयत्नाद् हि राष्ट्राणि निर्मीयन्ते न चान्यतः॥ ७७६ ॥

किं प्राप्तं धनसम्पत्त्या वाणिज्यादपि निष्फलात्।
निस्सारैः विरुदैश्चापि यत्र नास्ति स्वशासनम्॥
निर्मीयन्ते हि राष्ट्राणि स्वत एव न चान्यतः॥ ७७७ ॥

विश्रान्ता वा विनमिताः शायिता वा धरातले।
यत् कम्पध्वे भयेनार्ताः प्रमुग्धा बालका इव॥ ७७८ ॥

यूयं हे बालका मुग्धा प्रह्वीभूताश्च शायिताः।
कम्पध्वे किमु युष्माकं बाल्यं स्थास्नु भविष्यति ?॥ ७७९ ॥

दैवाद्वा राक्षसाद्वाऽपि न याचध्वं सहायताम्।
साहाय्यं तु स्वकीयेभ्यः याच्यतां नैव चान्यतः॥ ७८० ॥

पुरुषो विन्दते सर्वं संकल्पादपि साहसात्।
निजप्रयत्नाद् राष्ट्राणि प्रभवन्ति न चान्यतः॥ ७८१ ॥

हे पुत्राः भारतीमातुः उत्थाय कुरुतोद्यमम्।
निजप्रयत्नाद् राष्ट्राणि प्रभवन्ति न चान्यतः॥ ७८२ ॥

दृष्ट्वाऽत्र भारतीयानां दारिद्र्यं दुःख जीवनम्।
बोधयामास धनिकान् उद्विग्नो ह्यूम महाशयः॥ ७८३ ॥

"अस्मिन् महति साम्राज्ये राज्याद् राज्यं पुरात् पुरम्।
केनाऽप्यदृष्टो मौनी सन् सञ्चरामि विचारयन्॥ ७८४ ॥

एकमेव हि दृश्यं मे दृष्टिं बध्नाति सर्वतः।
जनानां यद् हि दारिद्र्यं रोगः पीडा च सर्वशः॥ ७८५ ॥

---

१. Page 56-62 Towards India's freedom and partition by S. R. Mehrothra.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रयते तादृशं दृश्यं विस्मर्तुं तदुपेक्षितुम् ।
न शक्नोमि तथा कर्तुं हृदि शल्यमिव स्थितम् ॥ ७८६ ॥

वाचंयमत्वमेतावत् पर्यन्तमवलम्बितम् ।
दमितुं नैव शक्नोमि विषयान् न च गूहितम् ॥ ७८७ ॥

प्रकाशनीयमेवैतत् वक्तव्यमिति भाति मे ।
यदस्मिन् भारते देशे पञ्चकोटिकसङ्ख्यकाः ॥ ७८८ ॥

कौपीनमात्रवसनाः शीतवातातपाहताः ।
रिक्तान्नाः बुभुक्षार्ता अदृष्ट सुख जीविकाः ॥ ७८९ ॥

जनाः तद्बालकाश्चापि नग्ना भग्ना उपेक्षिताः ।
म्रियमाणाश्च दृश्यन्ते रोगग्रस्ता दिने दिने ॥ ७९० ॥

अरे मनुष्याः ! भोगेषु सदा मग्नाः सुपोषिताः ।
अवगच्छत किं तेषामसंख्यानां दरिद्रताम् ॥
निस्सारमसुखं दुःखशतव्याप्तं च जीवितम् ॥ ७९१ ॥

जननात् मृत्युपर्यन्तं तेषा जीवनवर्त्मनि ॥
निराशा तमसाव्याप्ते विहीनसुखरश्मिके ॥ ७९२ ॥

दृश्यते भुज्यते चैव श्रमो नित्यपरिश्रमः ॥
क्षुधा ! क्षुधा !! बुभुक्षैव !!! रोगः पीडा च वेदना ॥ ७९३ ॥

अल्पायुर्जीवितस्यैतद् अहो लक्ष्यं च लक्षणम् ।
अभविष्यत् शुभतरं नाजनिष्यन्त ते यदि ॥ ७९४ ॥

अथवाऽद्यैव तान् सर्वान् कण्ठाबद्धशिलोच्चयान् ।
नद्यां न्यमज्जयिष्याम ततः शुभतरं नु किम् ? ॥ ७९५ ॥

निमग्नाः ! सुखभोगेषु यूयं किं द्रष्टुमिच्छथ ? ।
दृश्यमेषां सोदराणां निराशा दुःख भोगिनाम् ॥ ७९६ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चिन्तां कुरुत किं तेषां मग्नानां दुःखसागरे ।
किं मनुष्याः ! किमश्मानः ? यन्नपश्यथ दुःखितान् ॥ ७९७

किं प्राणिनः ? इति प्रश्नः युष्मास्वनुचितं, यतः ।
सहानुभूतिं कुर्वन्ति प्राणिनः स्वीय जातिषु ॥ ७९८ ॥

अतश्च प्रस्तरा एव, यूयं तु कथमन्यथा ।
दुःखोदधिमुपेक्षध्वे ग्रसन्तं पत्तले स्थितम् ॥ ७९९ ॥

मोदध्वे च हसन्तश्च पिबन्तः सुखभोगिनः ।
कुतोऽस्य राष्ट्रक्षोभस्य परिहारेऽप्यनुद्यताः ॥
सर्वं सहध्वे निश्चेष्टं सर्वथाऽपयशस्करम् ॥ ८०० ॥

इति द्वितीयो अध्यायः

१. पत्तले=पादयोः तले

page-61-62. Towards India's freedom and partition—S.R. Mehrothra.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयं अधिवेशनम् (मदरास्)

सन्नाहः—

विजित्य पश्चिमामाशां प्राचीं चापि महासभा।
समनन्तरवर्षेतु जिगीषुरिव दक्षिणाम्[1] ॥ ८०१ ॥

मदरास नगरे स्वस्याः समावेशमयोजयत्।
केन्द्रं यदान्ध्रकर्णाटकेरलद्रमिडौकसाम् ॥ ८०२ ॥

समावेशस्य सन्नाहं धनुर्मासे भविष्यतः।
चैत्रादेव समारभ्य चक्रुः तत्रत्य सज्जनाः ॥ ८०३ ॥

सत्कारसमितिञ्चापि समये समयोजयन्।
राजा सर्-टी. माधवो रावः यदाध्यक्ष्यं समावहत् ॥ ८०४ ॥

क्रैस्तवा हिन्दवो गौराः मुसलमानाश्च संगताः।
विंशोत्तरशतं यस्यां सदस्याः स्थानमाप्नुवन् ॥ ८०५ ॥

एम्० वीरराघवाचार्यः 'हिन्दू' पत्राधिपः सुधीः।
कञ्चिद् द्रमिडभाषायां लेखं प्रश्नोत्तरात्मकम्[2] ॥ ८०६ ॥

---

१. Extracts from pages 149-312 The encyclopedia of I.N. Congress Volume I— by Moin zaidi & shaheda zaidi.

२. Chatechisms. by Veeraraghavacharya; see page 11 Genesis & the first four years of the Congress.—by Mujumdar.
महता प्रयत्नेनापि अयं वीरराघवाचार्य लेखः न शक्यते लब्धुं।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाश्योद्दीपयामास सर्वशो जनजागृतिम् ।
व्यवृणोद् यत्र सर्वांश्च सर्वकारस्य दुर्नयान् ॥ ८०७ ॥

नीतौ निर्वाहविषये धारासमितियोजने ।
सदस्यानां नियुक्तौ च गुणान् दोषांश्च तत्कृतान् ॥ ८०८ ॥

धारा सभानां दौर्बल्यं प्रजानां क्लेशकारणम् ।
क्लेशापनयनोपायं निर्वाहस्य सुधारणम् ॥ ८०९ ॥

तृतीयं संमेलनम्- (मदरास्)

अत्यावश्यकतां सर्वप्रजानां जागृतेस्तथा ।
तत्र कांग्रस सभायाश्चलक्ष्यं विस्तरशोऽब्रवीत् ॥ ८१० ॥

त्रिशत्सहस्र संख्याकाः तस्य लेखस्य पुस्तिकाः ।
विक्रीताश्च वितीर्णाश्च प्रजासु विनियोजिताः ॥ ८११ ॥

इममेव पुनर्लेखं उर्दू भाषया कृतम् ।
मुद्रापयित्वा प्राकाश्यं निन्ये चोत्तरभारते ॥ ८१२ ॥

बहुसाहस्रसङ्ख्याकाः पुस्तिका विनियोज्यसः ।
लक्ष्यं प्रचारयामास कांग्रसीयं सविस्तरम् ॥ ८१३ ॥

भाषालेखं पठित्वैनं पुरग्रामनिवासिनः ।
उद्बुद्धाश्चोत्सुकाश्चासन् कांग्रसीयाधिवेशने ॥ ८१४ ॥

प्रत्येकं मंडले प्रायः पृथक् संस्थाश्च योजिताः ।
स्वं स्वं प्रतिनिधिं वृत्वा प्रेषयेयुर्यथाविधि ॥ ८१५ ॥

अतः सम्मेलनस्यास्य वैलक्षण्यं स्फुटं भवेत् ।
यतः प्रतिभुवः सर्वे यथाविधि जनै र्वृताः ॥ ८१६ ॥

तेषां गतागतार्थेऽपि धनं तैरेव दापितम् ।
एकैकमाणकं केचिद् रूप्यार्धं च तथाऽपरे ॥ ८१७ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपरे रूप्यमेकं च प्रददुः श्रमजीविनः।
व्यापारिणश्च धनिकाः स्वस्वशक्त्यनुसारतः ॥ ८१८ ॥

भूपालकृतं समर्थनम्—

मैसूर राज्य महाराजः स्वस्यौदार्यं प्रदर्शयन्।
साहाय्यमार्थिकं चक्रे कांग्रस्लक्ष्यं समर्थयन् ॥ ८१९ ॥

भारते मार्गदर्शीयः प्रजाशासन पद्धतेः।
निर्वाचितानां सभ्यानां मतमादृत्य शास्ति च ॥ ८२० ॥

तिरुवाङ्कूर् महाराजः तथा कोच्ची महीपतिः।
राजा च वेङ्कटगिरेः, इत्येते च सहायकाः ॥ ८२१ ॥

यदत्रतु महाराजः विजयानगराधिपः।
सोत्साहश्च युवा चैव प्रथमं जनसंसदि ॥ ८२२ ॥

आगत्य प्रजया सार्धं उपविश्याप्यदर्शयत्।
सहानुभूतिं सुदृढां काङ्स्लक्ष्य समर्थने ॥ ७२३ ॥

तदेतत् प्रेक्षकाः सर्वे राज्ञां हृदि विवर्तनम्।
उत्पन्नं वीक्ष्य सन्तुष्टाः शकुनं मेनिरे शुभम् ॥ ८२४ ॥

आंग्लैः अन्यैश्च कृतं समर्थनम्—

अन्यश्चाऽपि विशेषोऽस्मिन् सम्मेलन महोत्सवे।
यद्राज्यप्रमुखश्चापि समर्थनमचीकरत् ॥ ८२५ ॥

'कनिमारा' नामकोऽसौ काङ्ग्रासीय सभापतिम्।
सहानुगं समाहूय सत्कारं स्वगृहेऽकरोत् ॥ ८२६ ॥

---

१. उपर्युक्तानां प्रमाणार्थं—
—See page 46-47 A Hundred years of the Hindi.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नार्टन् नामा प्राड्विवाकोऽप्येतान् कांग्रस् सभासदः ।
आतिथ्येनार्चयामास सविनोदो न सादरम् ॥ ८२७ ॥

यूरोपीयाश्च बहवः सपत्नीकाः सहानुगाः ।
बोबलीराजवर्याद्याः ददुर्यस्मिन्नुपस्थितिम् ॥ ८२८ ॥

आन्ध्र, केरल, कर्णाट, द्रमिडेषु प्रतिष्ठिताः ।
महाजनाः धनं प्रादुः सहस्राणि शतानिच ॥ ८२९ ॥

आ मैसूर् राज्य भूपालात् आच ग्रामस्थतक्षकात् ।
उत्तमाधममक्ष्यस्थ वर्गीयाः स्वेच्छया जनाः ॥ ८३० ॥

धर्मपीठाधिपतयः मन्दिरेष्वर्चकास्तथा ।
यथा शक्ति च साहाय्य आर्थिकं चक्रुरादरात् ॥ ८३१ ॥

तथा मलेया शिंगापुर, माण्डले ब्रह्मदेशतः ।
धनं संप्रेषयामासुः तत्रत्याः भारता जनाः ॥ ८३२ ॥

आङ्ग्ल भाषा पत्रिकाभिः लन्दन् टैम्फ्' पत्रिकां विना ।
मुस्लीम्पत्रैस्तथांग्लैश्च कृतं कांग्रस् समर्थनम् ॥ ८३३ ॥

मद्रास् 'मेल' पत्रिका चाऽपि सदाऽपस्वरभाषिणी ।
सुस्वरं भाषमाणाऽद्य समर्थनमचोकरत् ॥ ८३४ ॥

मंडपनिर्माणम्—

मंडपो निर्मितः स्थाने "मेकीज़ गार्डन्" समाह्वये ।
दीर्घायतो विशालश्च नारिकेलकटावृतः ॥ ८३५ ॥
मध्ये च रङ्गमञ्चेन कटि दघ्नेन शोभितः ।
योऽवकाशं सहस्राणां जनानां दातुमर्हति ॥ ८३६ ॥

प्रतिनिधीनां आगमनम्—

पश्चिमात्तर राज्याच्च पाच्योत्तर हिमालयात् ।
आगताः समतीत्यैतं मार्गं साहस्रयोजनम् ॥ ८३७ ॥

---

२. प्राड्विवाकः=Advocate

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रधूम शकट द्वारा प्रश्यन्तः विविधान् गिरीन् ।
देशान् नदनदींश्चापि दृश्यानि विविधानि च ।। ८३८ ।।

वातावरण भेदाँश्च प्रकृत्यैव व्यवस्थितान् ।
देशान् नदीमातृकांश्च बहुशो देवमातृकान् ।। ८३९ ।।

आहारव्यवहारेषु वैविध्यं देश भेदतः ।
विविधास्वपि भाषासु भावैक्यं बुद्धिपूर्वकम् ।। ८४० ।।

राष्ट्रैक्य भावनां चाऽपि बद्धमूलां विशेषतः ।
जनप्रति भुवः प्रापुः मदरास् नगरीं ततः ।। ८४१ ।।

मदरास् नगरस्य वैशिष्ट्यम्—

आन्ध्र केरल कर्णाटतुलुव द्रमिडौकसाम् ।
राजधानीं महेन्द्रस्य पुरीमिव सुशोभिताम् ।। ८४२ ।।

